491·2824

श्रीमत्

सुबोध-संस्कृतम्

OR

EASY STEPS TO SANSKRIT

(FIRST STEP)



1925 July, First Edition (Marathi, Gujarati, Sindhi, Kanarese & Hindi)
1927 July, Reprint (Marathi).
1931 January, Second Edition (revised & enlarged) [Marathi & Gujarati].
1932 July, Second Edition (revised & enlarged) [Kanarese].
1933 July, *Reprint* Second Edition (revised & enlarged) [Marathi & Gujarati].
1938 March, *Reprint* (Marathi).
1945 May, *2nd Reprint* (Gujarati)—"War-time" reprint.
1955 October, (All-India "Independence") edition. (First)

BY

B. B. KAMAT, B.A., B.Sc. (Bombay), B.E.S. (retired)

(Bijapurkar Sanskrit Scholar, Rajaram College, 1898)
Head Master, (Govt.) Northcote High School Sholapur, (1931–36
Inspector of Science Teaching in the Bombay Presidency. 1926–30

PRICE—Rupees Two

(All rights are reserved by the author including that of the title and of translation into Indian and European Languages.)

1955—"Independence Edition" for India (*a*) North and (*b*) South

(*a*) Hindi; Sindhi; Gujarathi; Marathi; (Bengali in preparation)
(1000) (500) (500) (500)

(*b*) Kannada; (Tamil; Telugu; Malayalam in preparation)
(500)

Author and Publisher Mr. B. B. KAMAT,

No. of Copies : 3000

Paper—22½ × 35 —36 lbs. white, glazed Indian made.

Printed by Mr. K. G. Sharangpani at the Aryabhushan Press, 915/1 Shivajinagar, Poona 4, and Published by Mr. B. B. Kamat, at the Saraswat Brahman Colony, 433/11 Somwar Peth, Poona 2.

RESPECTFULLY DEDICATED TO

SHRIMANT BHAVANRAO SHRINIVASRAO

alias

BALASAHEB PANDIT PANT PRATINIDHI, B.A.,

The (Late) Raja of Aundh,

Whose "Picture Rāmāyan" inspired the author to

write this book.

PREFACE (1955--All-India " Independence " Edition)

सुबोध-संस्कृतम् or Easy Steps to Sanskrit **aims** at making Sanskrit **easy to learn and easy to teach.** How this may be achieved is set forth in the "Fore-word", clearly and at some length, for the edification of the teacher and the taught.

सुबोध-संस्कृतम् brings the beginner straightway face to face with easy Sanskrit language *and literature* without his having to wade through grammar at the very outset. The very simplicity of the language used induces " him to take in the sense and some of the salient peculiarities of the language."

Side by side. सुबोध-संस्कृतम् **has one more aim in view.** viz. to cherish the study of the epics in the young pupil's mind. At the very start, simple Sanskrit sentences begin to weave themselves into a narrative with Shri Rama as the hero ; and by the time he finishes this, the first part, the beginner already finds himself in the midst of the Ramayan,. his way to that epic being smoothly paved for him by Subodh-Sanskritam.

(He may then proceed further to the रामायण in Part II or pass on to the महाभारत, in Part-Intermediate).

In my humble opinion, the pupils should make an early acquaintance with the Epics which have been our national assets and whose achievements in the past have been unique. During the several centuries preceding the British regime, the masses of India, though mostly il-literate, were never without enlightenment, — mental, moral and social. The Epics were the fountain heads of knowledge at which saints and Kirtankars and Puraniks drank deep and chose themes for their sermons at temples and halls — private and public — where they always found eager audiences, waiting for them. With them, " the **House** was always **Full** " to overflowing. The Kirtans and Puranas were, in fact, very lively lessons and so thorough and so effective was their presentation of ideas

and ideals based on the epics that a common "Indian culture" has been an abiding result, — a fact which is easily in evidence in the mental matrix of the masses, even of today, all over India, irrespective of their language or locality or their form of worship. Educationally the Epics present immense possibilities and should be brought into the school early and their study cherished at the High School stage.

सुबोध-संस्कृतम् makes an humble attempt in that direction by making Sanskrit easy for the beginner.

The Sanskrit text, remains the same unchanged; but following the advent of our National Independence, some re-adjustments of the contents were over-due :

Hindi, being declared to be our National Language and expected gradually to replace English, esp. in the lower standards, the shorter explanations are given in simple Hindi only, in all the regional editions (in place of English). The vocabulary at the end is Sanskrit-into-Hindi).

In all the editions, however, **the Mother-tongue** holds the palm in that important portion of the book, viz., the Fore-word (or निवेदनम्). The Mother-tongue is by far the best medium where a thorough understanding is the main concern and the use of the same is emphasised in teaching the text. A special vocabulary for ready reference, precedes the text in all cases, giving suitable equivalents for Sanskrit words—into — Mother tongue, lesson by lesson.

The printing of all the regional languages in one and the same *script* (लिपि),—in देवनागरी or in any other,—will still remain a cherished dream. The adoption of देवनागरी for printing regional languages should be unanimous for being cordially accepted. In the absence of such unanimity on the point, I am slightly receding from my position in the First-Edition of 1925: The regional languages are printed (as a temporary measure) in the regional scripts—with one exception, however, viz., Sindhi which is printed in देवनागरी as before.

The younger Sindhi generation of 1955 has no prospects to go back to Sindh. They are also more famillar with देवनागरी,—now that Hindi in देवनागरी is compulsory for them. As a matter of fact, देवनागरी will be a potent factor in their future.

It is hoped that the book will make a wider appeal on account of its modern trends.

I am very thankful to the manager of the Aryabhushan Press, for getting the book through the press very promptly and in the nice way of printing which I hope the readers will appreciate.

गणेशचतुर्थी, Poona.

19th September 1955. B. B. KAMAT.

Excerpts—from previous editions.

1925, 16th July. (First Edition, in Marathi, Gujarati, Sindhi and Kannad.)

A feeling of joy and zest at the out-set should go a long way to encourage a beginner to like his lessons in the study of a new language. Hence this humble attempt.

The main function of this book—is the reading of the story and the first reading need not be disturbed with any *formal* teaching of grammar. It will be found that as a result of several factors introduced, the pupil gets smoothly along with the flow of the narrative and *sub-consciously* picks up some grammar on the way.

While I am entirely responsible for the defects and inaccuracies, that may be found in the book, I owe a debt of gratitude to my colleagues at the N. J. V. High School, Karachi,—Messrs. N. D. Abhyankar, D. A. Mandke. A. V. Chavan and B. N. Ashtaputre—for help in several ways and particularly to Mr. D. S. Patkar for three of the pictures. I cannot also omit to mention the kindness of Professors P. V. Kane, G. S. Ghurye and P. V. Kulkarni for going through a portion of the Mss. and making valuable suggestions. My thanks are also due to Mr. Bherumal Mahirchand of the D. J. Sind College and Mr. A. V. Chavan of the N. J. V. High School for suggesting several appropriate Sindhi equivalents.

1931 1st January (Second edition).

I am grateful to Prof. V. K. Rajwade for going through the book from cover to cover and making valuable suggestions.

1932—(Kannada edition).

I am very grateful to Mr. D. Ramayya, Superintendent, (Princes Jayachamaraj Wadiyar's School, Mysore) for kind help spontaneously offered and to पंडित मोटंगानपल्ली रामशेषशास्त्री, आस्थान-विद्वान् who scrutinised the Kannad equivalents.

1934 Part II. gives अयोध्याकांड to follow बालकांड of Part 1.)
In both the parts, the story element predominates and grammar is taught through literature and for literature and just the quantity of grammar required for understanding of the literature is given.

1935 (Part Inter-Mediate deals with महाभारत (आदिपर्व) and provides a change : This other Epic is largely drawn upon, both for simple verse and for सुभाषितs. The fascinating story of the Pandawas is illuminated with novel pictures by the Raja of Aundh and by Mr. S. K. Joshi of the Northcote High School Sholapur.



निवेदनम् (FOREWORD)

आभार—ಈ ಪುಸ್ತಕದೊಳಗಿನ ಕನ್ನಡ ಶಬ್ದಗಳ ಉಪಯೋಗವು **ಶ್ರೀ. ಡಿ. ರಾಮಯ್ಯಾ** (ಜಯಚಾಮರಾಜೇಂದ್ರ ಪ್ರಿನ್ಸಿಸ್ ಸ್ಕೂಲ್, ಮೈಸೂರು) ಇವರು, ಸ್ವರ್ಗವಾಸಿ ಮೋಟಂಗಾನಪಲ್ಲಿ ರಾಮಶೇಷಶಾಸ್ತ್ರಿ, ಆಸ್ಥಾನ ಮಹಾ ವಿದ್ವಾನ, ಇವರ ಕಡೆಯಿಂದ ಮಾಡಿಸಿದೆ. ಈ ನಿವೇದನೆಯ ಕನ್ನಡ ಭಾಷಾಂತರ ಮಾಡಿ ಅಚ್ಚು ಮಾಡಿದ ಪ್ರತಿಗಳನ್ನು ಸಂಶೋಧನ ಮಾಡುವ ಕೆಲಸ ಶ್ರೀ. ಕೆ. ಸೂರ್ಯನಾರಾಯಣರಾವ, ಬಿ. ಎ. (ಮೈಸೂರು) ಮತ್ತು ಶ್ರೀ. ನಾರಾಯಣ ರಾವ ಶಿವರಾವ ಮಾವಿನಕುರ್ವೆಯವರು ಮಾಡಿದ್ದಾರೆ. ಈ ಅಮೂಲ್ಯವಾದ ಸಹಾಯದ ಬಗ್ಗೆ ಈ ಮೇಲೆ ಹೇಳಿದ ಸದಗೃಹಸ್ಥರಿಗೆ ಗ್ರಂಥಕರ್ತನು ಆಭಾರಿ ಯಾಗಿರುತ್ತಾನೆ.

ಸುಬೋಧ ಸಂಸ್ಕೃತದ ಉಪಯೋಗವನ್ನು ಯಾವ ರೀತಿಯಲ್ಲಿ ಮಾಡಬೇಕು ?

ಸಂಸ್ಕೃತವನ್ನು ಕಲಿಸುವ **सुबोध संस्कृत** ದ ಒಂದು ಸುಲಭವಾದ ಪದ್ಧತಿಯು ಇರುತ್ತದೆ. ಸಧ್ಯದಲ್ಲಿ ಕಲಿಸುವ ಬೇರೆ ಬೇರೆ ಪದ್ಧತಿಗಳಿಗಿಂತ ಈ ಪದ್ಧತಿಯು ಸ್ವಲ್ಪ ಭಿನ್ನವಿದೆ. ಆದ್ದರಿಂದ ಈ ಪದ್ಧತಿಯು ಸ್ವಲ್ಪ ವಿಸ್ತಾರದಿಂದ ಕೆಳಗೆ ವಿವರಿಸಲ್ಪಟ್ಟಿದೆ.

ಸಂಸ್ಕೃತವನ್ನು ಮಾತೃ ಭಾಷೆಯ ಸಹಾಯದಿಂದ ಕಲಿಸಬೇಕು. ಇದರ ಕೂಡ ಕೊಟ್ಟ ಶಬ್ದ ಸಂಗ್ರಹದ (ಪುಟ xiii-xviii) ಉಪಯೋಗಿಸಿ ಸುಲಭವಾದ ವಾಕ್ಯಗಳಿಂದ ತಯಾರಿಸಿದ ಕಥೆಯ ಭಾಷಾಂತರವನ್ನು ಮಾಡುತ್ತ ಮಾಡುತ್ತ ಮುಂದುರಿಯುವದು. ಮತ್ತು ಸಂಸ್ಕೃತ ಪಾಠವನ್ನು ಓದಿ ಅದರ ಅರ್ಥವನ್ನು ತಿಳಿದುಕೊಳ್ಳುವದೇ ಮುಖ್ಯವಾದ ಕಾರ್ಯಕ್ರಮವು ಇರಬೇಕು. ಪ್ರಾರಂಭದಲ್ಲಿ ಅಗತ್ಯವಿದ್ದಷ್ಟೇ ವ್ಯಾಕರಣವನ್ನು ಕಲಿಸಬೇಕು.

सुबोध संस्कृत ದ ಧ್ಯೇಯವು ಯಾವ ರೀತಿಯದೆಂದರೆ ಕನ್ನಡ ತಿಳಿಯುವ ಹೊಸ ವಿದ್ಯಾರ್ಥಿಗೆ ಸಂಸ್ಕೃತ ಕಲಿಯುವದು ಸುಲಭವೆಂದು ಕಾಣಬೇಕು; ಮೊದಲಿನಿಂದಲೆ ಅವನಿಗೆ ಉತ್ಸಾಹವಾಗಬೇಕು; ಆದಷ್ಟು ಬೇಗನೆ ಅದನ್ನು ಕಲಿಯಬೇಕೆಂಬ ಆಶೆಯು ಉತ್ಪನ್ನವಾಗಬೇಕು; ಮತ್ತು ಸಮುದ್ರದ ಹಾಗೆ ವಿಶಾಲವಾದ ಸಂಸ್ಕೃತ ವಾಙ್ಮಯದಲ್ಲಿ " नदीमुखेनेव समुद्रमाविशेत् " ಈ ಪ್ರಕಾರ ಅವನಿಗೆ ಸುಲಭವಾಗಿ ಆನಂದದಿಂದ ಪ್ರವೇಶ ಮಾಡಲಿಕ್ಕೆ ಬರಬೇಕು.

"ಸುಲಭ ಗ್ರಂಥವನ್ನು ಬರೆಯುವದು ಕಠಿಣ ಕಾರ್ಯವಿರುತ್ತದೆ. ಆದರೆ ಈ ಕಾರ್ಯವು **ಸುಬೋಧ ಸಂಸ್ಕೃತ** ದಲ್ಲಿ ಸಾಧ್ಯಮಾಡಲ್ಪಟ್ಟಿದೆ."* ಹೀಗೆ ಪಂಡಿತರ ಅಭಿಪ್ರಾಯವಿರುತ್ತದೆ. ಇದು ಯಾವ ರೀತಿ ಸಾಧ್ಯವಾಗಿದೆಂಬುದನ್ನು ತಿಳಿಯುವದ ಕ್ಕೋಸ್ಕರ ಆ ತಂತ್ರವನ್ನು ಸ್ವಲ್ಪ ವಿಸ್ತಾರದಿಂದ ಸ್ಪಷ್ಟಮಾಡಿದೆ.

"ಮೊದಲು ಭಾಷೆ ಆಮೇಲೆ ವ್ಯಾಕರಣ", ಹೀಗೆ **ಸುಬೋಧ ಸಂಸ್ಕೃತ** ದ ಯೋಜನೆ ಇರುತ್ತದೆ. ಸಂಧೀ ಉದ್ದೇಶಪೂರ್ವಕ ತೆಗೆದು ಹಾಕಿದ್ದರಿಂದ, ಶಬ್ದಗಳು ಒಂದರಲ್ಲೊಂದು ಕೂಡಿಲ್ಲ. ಆದ್ದರಿಂದ ಸ್ಪಷ್ಟ ರೀತಿಯಿಂದ ಶಬ್ದಗಳು ತಿಳಿಯುತ್ತವೆ. ಶಬ್ದ ಮತ್ತು ವ್ಯಾಕರಣ ಇವುಗಳ ಉಪಯೋಗ ಸಹ ಕನ್ನಡ ಭಾಷೆಯವರಿಗೆ ಸಾಧಾರಣವಾಗಿ ತಿಳಿಯುವಂತೆ ಇಷ್ಟವರಿಂದ ವಾಕ್ಯಗಳ ಅರ್ಥ ತಿಳಿಯಲಿಕ್ಕೆ ಸಹಾಯವಾಗುತ್ತದೆ.

ಪುಸ್ತಕದಲ್ಲಿ ಅಸಮಂಜಸವಾದ ವಾಕ್ಯಗಳನ್ನು ಉಪಯೋಗಿಸದೆ ಒಂದೇ ಕಥೆಯನ್ನು ವರ್ಣಿಸಿದ್ದದೆ. ಕಥೆಯ ಪ್ರವಾಹದಿಂದ ಎಳೆಯಲ್ಪಟ್ಟಂತೆ ಅವನಲ್ಲಿ ಮುಂದೆ ಹೋಗುವ ಆಶೆಯು ಬೆಳೆಯುತ್ತವೆ. ಮತ್ತು ಮುಂದೆ ಬರುವ ವಾಕ್ಯದ ಅರ್ಥವು ಅವನ ಲಕ್ಷದಲ್ಲಿ ಸಹಜವಾಗಿ ಬರುತ್ತದೆ. ಈ ಪ್ರಕಾರ ಅರ್ಥ ಮಾಡುತ್ತ ಮಾಡುತ್ತ ಮುಂದೆ ಹೋಗುವ ಪ್ರವೃತ್ತಿಯು ಅವನಲ್ಲಿ ಉಂಟಾಗುತ್ತದೆ.

ಈ ಕಥೆಯು ಶ್ರೀರಾಮಚಂದ್ರನದು, ಅಲ್ಲದೆ ಸಚಿತ್ರವಿರುತ್ತದೆ.

ಪುಣ್ಯ ಶ್ಲೋಕ ಶ್ರೀರಾಮನ ಚರಿತ್ರವು ಮತ್ತು ಸ್ವರ್ಗವಾಸಿ ಪಂಡಿತ ರಾಜಾಸಾಹೇಬ (ಔಂಧ) ಇವರ ಸುಂದರ ಮತ್ತು ಸೂಚಕ ಚಿತ್ರಗಳ ಕೂಡಿಕೆ ಯಿಂದ ಹಾಲಿನಲ್ಲಿ ಸಕ್ಕರೆ ಬೆರಿಸಿದಂತೆ ಆಗಿರುತ್ತದೆ. ಮತ್ತು ಸುದೈವದಿಂದ ಇದರ ಲಾಭವು **ಸುಬೋಧ ಸಂಸ್ಕೃತ** ಕ್ಕೆ ಸಿಕ್ಕಿರುತ್ತದೆ. ಚಿತ್ರಗಳನ್ನು ನೋಡಿದ ಕೂಡಲೆ ಓದುವ ಹುಡುಗನಿಗೆ ತಾನು ಏನು ಓದುತ್ತೇನೆಂಬುದು ತಿಳಿಯುತ್ತದೆ.

ಕಥೆಯು ಅತ್ಯಂತ ಪರಿಚಯದ್ದಿದ್ದು ಹುಡುಗರಿಗೆ ಪ್ರೀತಿಯುಳ್ಳದ್ದಾಗಿರುತ್ತದೆ. ಹಿಮಾಲಯದಿಂದ ಕನ್ಯಾಕುಮಾರಿಯವರೆಗೆ ಇರುವ ಸಣ್ಣ ದೊಡ್ಡವರಿಗೆಲ್ಲಾ ತಿಳಿದವಾಗಿ ಇರುತ್ತದೆ. ಆದ್ದರಿಂದ ಅಪರಿಚಿತ ಸಂಸ್ಕೃತ ಭಾಷೆಯು ಪರಿಚಿತವಿದ್ದಂತೆ ತೋರುತ್ತದೆ. ಸಂಸ್ಕೃತವು ಕಠಿಣವಿರುತ್ತದೆಂಬ ಭೀತಿಯು ನಿರಾಧಾರವಾಗಿ ಕಾಣುತ್ತದೆ ಮತ್ತು ಕಲಿಯುವಾಗ ಬೇಸರವಾಗುವದಿಲ್ಲ.

* ರಾಷ್ಟ್ರೀಯ ಶಿಕ್ಷಣದ ಆದ್ಯ ಪುರಸ್ಕರ್ತರಾದ ಸ್ವರ್ಗವಾಸಿ ಪ್ರಾಚಾರ್ಯ ವಿಷ್ಣು ಗೋವಿಂದ ವಿಜಾಪೂರಕರ, M. A., ಸಮರ್ಥ ವಿದ್ಯಾಲಯ, ತಳೆಗಾಂವ.

ಒಂದೇ ತರಹದ ಶಬ್ದ ಸಮೂಹ ಮತ್ತು ವಾಕ್ಯರಚನೆಯು ಬೇರೆ ಬೇರೆ ಸಂದರ್ಭಗಳಲ್ಲಿ ಉಪಯೋಗಿಸಲ್ಪಟ್ಟಿದೆ. ಆದ್ದರಿಂದ ಮೇಲಿಂದ ಮೇಲೆ ಪುನರುಚ್ಚಾರವಾಗುವವರಿಂದ ಭಾಷೆಯು ಮನಸ್ಸಿನಲ್ಲಿ ಧೃಢವಾಗುತ್ತದೆ.

ಶಬ್ದಗಳನ್ನು ಆರಿಸುವಾಗ ಸಾಧ್ಯವಾದಷ್ಟು ಕನ್ನಡದಲ್ಲಿ ಪ್ರಚಾರವಿದ್ದ (ತತ್ಸಮ) ಸಂಸ್ಕೃತ ಶಬ್ದಗಳನ್ನು ಉಪಯೋಗಮಾಡಿರುತ್ತದೆ.

ಸುಬೋಧ ಸಂಸ್ಕೃತ ದ ಸಹಾಯದಿಂದ ಸಂಸ್ಕೃತ ವ್ಯಾಕರಣವನ್ನು ಕಲಿಸಲಿಕ್ಕೆ ಯಾವ ರೀತಿ ಪ್ರಾರಂಭ ಮಾಡಬೇಕು ?

ಕೇವಲ ಕಥಾ ರೂಪದಲ್ಲಿ ಇದ್ದ ಸಂಸ್ಕೃತ ವಚನವೇ **ಸುಬೋಧ ಸಂಸ್ಕೃತ** ದ ಮುಖ್ಯ ಕಾರ್ಯಕ್ರಮವಾಗಿರುತ್ತದೆ. ಆದರೂ ಭಾಷೆಗೆ ವ್ಯಾಕರಣದ ಅಗತ್ಯವಿರುತ್ತದೆ. ವ್ಯಾಕರಣವನ್ನು ಕಲಿಸಲಿಕ್ಕೆ ಸುರುಮಾಡುವಾಗ ಸುಲಭ ರೀತಿಯಿಂದ ಬೋಧಿಸುವದು ಅಗತ್ಯವಿದೆ. ಕಥೆಯನ್ನು ಓದುವಾಗ ಕೇವಲ ಅಗತ್ಯವಿರುವ ಮತ್ತು ಮಹತ್ವದ ವ್ಯಾಕರಣವನ್ನು ಕಲಿಸಲಿಕ್ಕೆ ಉಪಯೋಗವಾಗುವಂತೆ ಮಾಡಲ್ಪಟ್ಟಿದೆ. ಆದರೂ ಪ್ರಾರಂಭದಲ್ಲಿ "ಪರಿಚಿತದಿಂದ ಅಪರಿಚಿತಕ್ಕೆ" (From the known to the unknown) ಈ ಪ್ರಕಾರ ಕಲಿಸುವ ತತ್ವ ಇರಬೇಕು. (ಸರಾಸರಿ ೧೫ ಪಾಠಗಳನ್ನು ಓದಿ ಆದನಂತರ ವ್ಯಾಕರಣವನ್ನು ಕಲಿಸಲಿಕ್ಕೆ ಸುರುಮಾಡಬೇಕು. ಇದರ ಸಲುವಾಗಿ ಮಾದರಿಯ ಕೆಲವು ಪಾಠಗಳನ್ನು ಮುಂದೆ ಸೂಚಿಸಿದ್ದೇವೆ. ಪುಟ x-xiv)

* ಸಧ್ಯದಲ್ಲಿ ಸಂಸ್ಕೃತ ಕಲಿಯುವ ವಿದ್ಯಾರ್ಥಿಗೆ ಸ್ವಲ್ಪ ಮಟ್ಟಿಗೆ ವ್ಯಾಕರಣವು ಒಂದೇ ಬರುತ್ತದೆ. ಕ್ರಿಯಾಪದ, ಕರ್ತೃ, ಕರ್ಮ, ವಿಭಕ್ತಿ, ಕಾಲ, ಪುರುಷ, ವಚನ ವಗೈರೆ ಶಬ್ದಗಳ ಸಾಕಷ್ಟು ಪರಿಚಯವಿರುತ್ತದೆ. ಈ ಪರಿಚಿತ ಕನ್ನಡ ವ್ಯಾಕರಣಕ್ಕೆ ಅಪರಿಚಿತ ಸಂಸ್ಕೃತ ವ್ಯಾಕರಣದ ಸಂಬಂಧವನ್ನು ತೋರಿಸಿಕೊಡುವದು ಸುಲಭವಾಗುತ್ತದೆ. ನಿಜವಾಗಿ ಅಡಚಣಿ ಬರುವದು ಪ್ರಾರಂಭದಲ್ಲಿ ಮಾತ್ರ ಇರುತ್ತದೆ. ಆದ್ದರಿಂದ ಪ್ರಾರಂಭದಲ್ಲಿರುವ ಪಾಠಗಳು ಮೇಲೆ ಕೊಟ್ಟ ಸೂಚನೆಗಳಿಗೆ ಅನುಸಾರವಾಗಿ ಸ್ವಲ್ಪ ಸವಿಸ್ತರವಾಗಿ ಕೊಟ್ಟಿರುತ್ತೇವೆ. ಅವುಗಳ ಮರ್ಮವನ್ನು ತಿಳಿದು ಕೊಳ್ಳಬೇಕು. (x-xiv ಪುಟ ನೋಡಿರಿ.)

---

* ಇತ್ತಕಡೆ ಪ್ರಸಿದ್ಧವಾದ ಮುಂಬೈ ಸ್ಟೇಟಿನ ಅಭ್ಯಾಸ ಕ್ರಮದ Syllabus ನೋಡಿರಿ. ಸಂಸ್ಕೃತ ಕಲಿಯಲಿಕ್ಕೆ VIII ಎತ್ತೆಯಲ್ಲಿ ಸುರುವಾಗುತ್ತದೆ, ಆದರೆ ಅದರ ಮೊದಲೇ (V ರಿಂದ VII ನೇ ವರ್ಗದ ವರೆಗೆ) ಮಾತ್ರ ಭಾಷೆಯ ವ್ಯಾಕರಣವನ್ನು ಕಲಿಸಿದ್ದು ಇರುತ್ತದೆ.

ಲಕ್ಷದಲ್ಲಿಡುವಂಥ ಕೆಲವು ಸೂಚನೆಗಳು

(೧) ವ್ಯಾಕರಣದ ಭಾಗದಲ್ಲಿ ೧ ರಿಂದ ೧೩೪ ರ ವರೆಗೆ ದಪ್ಪ ಸಂಖ್ಯೆಗಳನ್ನು ಕೊಟ್ಟಿರುತ್ತೇವೆ. ಅವುಗಳನ್ನು ಯಾಕೆ ಕೊಟ್ಟಿರುತ್ತವೆಂಬುದನ್ನು ತಿಳಿದುಕೊಳ್ಳಬೇಕು. ಈ ಸಂಖ್ಯೆಗಳು ಬೇರೆ ಬೇರೆ ವಿಷಯಗಳನ್ನು ತೋರಿಸುತ್ತವೆ. ಇದರ ಸಹಾಯದಿಂದ ವಿಷಯದ ಸಂದರ್ಭವು ಬೇಗನೇ ಸಿಗುತ್ತದೆ ಮತ್ತು ವೇಳೆಯು ಖರ್ಚಾಗುವದಿಲ್ಲ ಮತ್ತು ಆದರಿಂದಲೇ ವೇಳೆಯು ಕಡಿಮೆ ಹತ್ತುತ್ತದೆ. ಶಿಕ್ಷಕರಿಗೆ ಈ ಸಂಖ್ಯೆಗಳ ಚಲೋ ಪರಿಚಯವು ಅಗತ್ಯವಿದೆ.

(೨) ಪಾಠದೊಳಗಿನ ಸಂಸ್ಕೃತ ಶಬ್ದಗಳ ಕನ್ನಡ ಅರ್ಥವನ್ನು (ಪುಟ xv–xxviii ರ ಮೇಲಿನ ಶಬ್ದಕೋಶದಲ್ಲಿ) ಪಾಠಗಳ ಅನುಕ್ರಮದಿಂದ ಕೊಟ್ಟಿರುತ್ತದೆ.

(೩) ಶಬ್ದಕೋಶದೊಳಗಿಂದ ಶಬ್ದದ ಅರ್ಥವನ್ನು ತೆಗೆಯಲಿಕ್ಕೆ ಕಲಿಯಬೇಕು. ಅದರಿಂದ ವಿದ್ಯಾರ್ಥಿಗೆ ಸ್ವಾವಲಂಬನದ ಅಭ್ಯಾಸವಾಗುತ್ತದೆ. ಮತ್ತು ಮುಂದೆ ಸಂಸ್ಕೃತ ಅಭ್ಯಾಸವನ್ನು ಮಾಡುವದಿದ್ದರೆ ಈ ಪದ್ಧತಿಯು ಬಹಳ ಉಪಯೋಗವಾಗುತ್ತದೆ. ಈ ಅಭ್ಯಾಸವು ಅವನಲ್ಲಿ ಇರಲಿಕ್ಕೇ ಬೇಕು.

(ನನ್ನ ವರ್ಗದಲ್ಲಿ ಪ್ರತಿ ಇಬ್ಬರೊಳಗೆ ಒಬ್ಬನ ಹತ್ತಿರ ಕೈ. ಜೆ. ವ್ಹಿ. ಓಕ ಇವರ ಗೀರ್ವಾಣ ಲಘುಕೋಶದ ಒಂದೊಂದು ಪ್ರತಿಯು ಇದ್ದು ಹೊಸ (Unseen) ಶ್ಲೋಕಗಳ ಅರ್ಥ ಮಾಡಲಿಕ್ಕೆ ಉಪಯೋಗ ಮಾಡುತ್ತಿದ್ದರು.)

(೪) ಉಚ್ಚಾರವನ್ನು ಶುದ್ಧ ಮಾಡಬೇಕು.

ಶಿಕ್ಷಕರು ಸಾವಕಾಶ ಮತ್ತು ಸ್ಪಷ್ಟವಾಗಿ ವಾಕ್ಯಗಳನ್ನು ಓದಬೇಕು. ಮತ್ತು ಇಡೀ ವರ್ಗದವರು ಅದರ ಪುನರುಚ್ಚಾರ ಮಾಡಬೇಕು. ಈ ಪ್ರಕಾರ ವಾಚನವಿರಬೇಕು. ಮಧ್ಯದಲ್ಲಿಯೇ ಯಾವನೊಬ್ಬ ಹುಡುಗನಿಗೆ ಓದಲಿಕ್ಕೆ ಹೇಳಬೇಕು. ಹೀಗೆ ಪರೀಕ್ಷಾತ್ಮಕ ರೀತಿಯಿಂದ ಎಲ್ಲ ಹುಡುಗರಿಗೆ ಚನ್ನಾಗಿ ಉಚ್ಚಾರ ಮಾಡಲಿಕ್ಕೆ ಬರುತ್ತದೋ ಇಲ್ಲವೆಂಬದು ಶೋಧಿಸಿ-ನೋಡಬೇಕು. ಅಭ್ಯಾಸದಲ್ಲಿ ಹಿಂದೆ ಉಳಿದ ವರ್ಗದೊಳಗಿನ ಹುಡುಗರ ಕಡೆಯಿಂದ ಆದಷ್ಟು ಎಲ್ಲಾ ಪಾಠಗಳನ್ನು ಓದಿಸಿಕೊಳ್ಳುವದು ಉತ್ತಮ.

ಸ್ವರವು ಹ್ರಸ್ವವೋ ಅಥವಾ ದೀರ್ಘವೋ, ವ್ಯಂಜನವು ಪೂರ್ಣವೋ ಅಥವಾ ಅಪೂರ್ಣವೋ ಎಂಬುದು ಕಿವಿಯ ಮೇಲೆ ಬಿದ್ದ ಕೂಡಲೆ ತಿಳಿಯಬೇಕು.

ಜೋಡಾಕ್ಷರದ ಮೊದಲಿನ ಸ್ವರದ ಮೇಲೆ ಜೋರು ಕೊಡಬೇಕು. ಎಲ್ಲ ಜನರ ಉಚ್ಚಾರಗಳು ಶುದ್ಧವಿದ್ದರೆ ಭಾರತದೊಳಗಿನ ಬಹು ಜನ ಸಮಾಜದಲ್ಲಿ ಒಂದೇ ರೂಪತೆಯು ಬೆಳೆಯುವದು.

(೫) ಕಲಿಸಿ ಆದ ವಿಷಯಗಳನ್ನು (ವ್ಯಾಕರಣದ ರೂಪಗಳು ಶ್ಲೋಕಗಳು ವಗೈರೆ) ಪ್ರತಿದಿವಸ ಸಾಮುದಾಯಕ ರೀತಿಯಿಂದ ಹೇಳಿಸಿಕೊಳ್ಳಬೇಕು.

ಈ ರೀತಿಯಿಂದ **सुबोध संस्कृत** ದ ಎರಡು ಮೂರು ವೇಳೆ ಪಾರಾಯಣವಾಗಬೇಕು.

ವಾಕ್ಯದ ಹಿಂದೆ ವಾಕ್ಯ, ಪಾಠದ ಹಿಂದೆ ಪಾಠ, ಇವುಗಳ ವಾಚನವು ಮತ್ತು ಭಾಷಾಂತರವು ನಡೆದಿರುವಾಗ ಕಥೆಗೆ ಪ್ರವಾಹದ ಸ್ವರೂಪ ಬರುತ್ತದೆ. ಮತ್ತು ವಿದ್ಯಾರ್ಥಿಯ **ಮನಸ್ಸಿನಲ್ಲಿ** ತನ್ನಷ್ಟಕ್ಕೆ ಸಂಸ್ಕೃತ ಭಾಷೆಯ ಪರಿಚಯವು ಬೆಳೆಯುತ್ತ ಹೋಗುತ್ತದೆ. **ಕಿವಿಗೆ** ಮತ್ತು **ನಾಲಿಗೆಗೆ** ಶುದ್ಧ ಮತ್ತು ಸ್ಪಷ್ಟ ಉಚ್ಚಾರಗಳ ಅಭ್ಯಾಸವಾಗುತ್ತದೆ. ಮತ್ತು **ಕಣ್ಣುಗಳಿಗೆ** ದೊಡ್ಡ ಮುದ್ರಣದ ಆನಂದವಾಗುತ್ತದೆ. ಅದಲ್ಲದೆ ಸಂಸ್ಕೃತ ಕಲಿಯಲಿಕ್ಕೆ ಪ್ರಾರಂಭ ಮಾಡಿದ ಸ್ವಲ್ಪ ಅವಧಿಯಲ್ಲೇ ಸಂಸ್ಕೃತ ಕಲಿಯುವದು ಕಠಿಣವಿಲ್ಲ ಎಂಬ ಭಾವನೆಯು ಮನಸ್ಸಿನಲ್ಲಿ ಉದ್ಭವಿಸುತ್ತದೆ. ಮತ್ತು ಇದರಿಂದ ವಿದ್ಯಾರ್ಥಿಗೆ ಆನಂದದಿಂದ ಮುಂದೆ ಮುಂದೆ ಕಲಿಯುತ್ತ ಹೋಗಲಿಕ್ಕೆ ಉತ್ಸಾಹ ಉಂಟಾಗುತ್ತದೆ.

[ಶುರು ಮಾಡಿದ ನಂತರ ಸರಾಸರಿ ೩ ತಿಂಗಳೊಳಗೆ **सुबोध संस्कृत** ದೊಳಗಿನ ೩೯ ಪಾಠಗಳನ್ನು ಕಲಿಯಲು ಸಾಧ್ಯವಾಗುತ್ತದೆ. ಮತ್ತು ಡಾ. ಭಂಡಾರಕರವರ ಮೊದಲನೇ ಪುಸ್ತಕದೊಳಗಿರುವ ವ್ಯಾಕರಣವನ್ನು ಕಲಿತಂತಾಗುತ್ತದೆ. ಅದಾದ ನಂತರ ದಿನಂಪ್ರತಿಯ ಕಾರ್ಯಕ್ರಮವು ಮುಂದೆ ತೋರಿಸಿದಂತೆ ಇರಬೇಕು :—

ಮೊದಲಿಗೆ ಶಿಕ್ಷಕರು ಒಂದು ಸುಲಭವಿರುವ ಶ್ಲೋಕವನ್ನು (ಉದಾ :— अनुष्टुप्) ಬೋರ್ಡಿನ ಮೇಲೆ ಸಂಧಿ ಬಿಡಿಸಿ ಬರೆಯಬೇಕು. ಮತ್ತು ಪ್ರತಿಯೊಬ್ಬ ವಿದ್ಯಾರ್ಥಿಯು ಕ್ರಿಯಾಪದ, ಕರ್ತೃ, ಕರ್ಮಗಳನ್ನು ಹುಡುಕಿ ಮತ್ತು ಅವಶ್ಯವಿದ್ದರೆ ಕೋಶದ ಉಪಯೋಗ ಮಾಡಿ ಯತ್ನದಿಂದ ಅರ್ಥ ಮಾಡಿಕೊಂಡು ತನ್ನ ನೋಟಬುಕ್ಕಿನಲ್ಲಿ ಬರಕೊಳ್ಳಬೇಕು. ಆಮೇಲೆ ಎಲ್ಲರೂ ಕೂಡಿ ಆ ಶ್ಲೋಕದ ಬಗ್ಗೆ ಚರ್ಚೆ ಮಾಡಬೇಕು.

ನಂಬರ ೯೧ ರಿಂದ ೧೦೭ ನೇ ನಿಯಮಗಳ ಸಹಾಯದಿಂದ ಶ್ಲೋಕದಲ್ಲಿ ಬಂದ ಸಂಧಿಗಳನ್ನು ಬಿಡಿಸಬೇಕು. ಮೇಲಿನ ವರ್ಗದೊಳಗೆ ಹೋಗುವ ಮೊದಲು ಸಂಧಿ ನಿಯಮಗಳು ಚೆನ್ನಾಗಿ ಅರಿತುಕೊಳ್ಳಬೇಕು.

ಬೋರ್ಡಿನ ಮೇಲೆ ಬರೆದ ಶ್ಲೋಕದ ಕೆಲಸವಾದ ನಂತರ ಪ್ರತಿದಿವಸದ ಕೆಲಸ, ಪಾಠ, ವಾಚನ ವಗೈರೆ ಸುರು ಮಾಡಬೇಕು.

ಈ ಪ್ರಕಾರ ವಿದ್ಯಾರ್ಥಿಗಳು ಒಂದು ವರ್ಷದೊಳಗೆ ನೂರರಕ್ಕಿಂತ ಹೆಚ್ಚು ಶ್ಲೋಕಗಳನ್ನು ಕಲಿತು ಅವರ ಶಬ್ದ-ಸಂಗ್ರಹವನ್ನು ಬೆಳಿಸಬಹುದು.]

ವ್ಯಾಕರಣ ಕಲಿಸಲಿಕ್ಕೆ ಪ್ರಾರಂಭ.

[ವ್ಯಾಕರಣ ಶುರು ಮಾಡುವ ಮೊದಲು ಸಾಧಾರಣ ೧೫ ಪಾಠಗಳ ವಾಚನ ಮತ್ತು ಭಾಷಾಂತರ ಆದದ್ದಿರಬೇಕು. ಎರಡು ಮೂರು ಸರ್ತಿ ಆದದಿದ್ದರೆ ಬಹಳ ಚಲೋದು.

ಕನ್ನಡ ಮತ್ತು ಸಂಸ್ಕೃತ ವಾಕ್ಯಗಳ ರಚನೆಯೊಳಗೆ ಕೆಲವುಕಡೆಯಲ್ಲಿ ಸಾಮ್ಯ ಮತ್ತು ಭೇದಗಳಿರುತ್ತವೆ. "Compare and contrast" ಅಂದರೆ "ತುಲನೆ ಮಾಡಿ ಸಾಮ್ಯತೆ ಮತ್ತು ಭೇದ ತೋರಿಸುವ" ಪದ್ಧತಿಯು ಸ್ವಲ್ಪ ವಿಸ್ತಾರದಿಂದ ಕೆಳಗೆ ತೋರಿಸಿರುತ್ತದೆ.]

[ಗುರುಗಳು:-] ಮೊದಲಿನ ಪಾಠವನ್ನು ಪುನಃ ಓದಲಿಕ್ಕೆ ಶುರು ಮಾಡೋಣ.

(ಬೋರ್ಡಿನಮೇಲೆ ಬರೆಯುವಾ).	बालकः	गणेशम्	नमति ।
(ಈ ವಾಕ್ಯದ ಅರ್ಥವು)	ಹುಡುಗನು	ಗಣೇಶನಿಗೆ	ನಮನ ಮಾಡತ್ತಾನೆ
(ಇದರೊಳಗೆ ಕರ್ತೃ, ಕ್ರಿಯಾಪದ, ಕರ್ಮ, ವಿಭಕ್ತಿ, ಬರೆದು ತೋರಿಸುವಾ)	(कर्ता) (प्रथमा)	(कर्म) (द्वितीया)	(क्रियापद)

ಯಾವ ಪ್ರಕಾರ ಕನ್ನಡದಲ್ಲಿ ಕರ್ತೃವಿನ ವಿಭಕ್ತಿ ಪ್ರಥಮಾ ಮತ್ತು ಕರ್ಮದ ವಿಭಕ್ತಿ ದ್ವಿತಿಯಾ ಇರುತ್ತದೆ ಹಾಗೆಯೆ ಸಂಸ್ಕೃತದಲ್ಲಿ ಸಹ ಇರುತ್ತದೆ.

ಅಂದರೆ	बालकः	ಕರ್ತೃವಿನ ವಿಭಕ್ತಿ	प्रथमा
	गणेशम्	ಕರ್ಮದ ವಿಭಕ್ತಿ	द्वितीया

विभक्ति

ಬಾಲಕ, ಗಣೇಶ, ಹಸ್ತ, ಈ ಶಬ್ದಗಳ ಅಂತ್ಯದಲ್ಲಿ ' ಅ ' ಇರುತ್ತದೆ ಅಂದರೆ ಈ ಶಬ್ದಗಳಿಗೆ ಅಕಾರಾಂತ ಅನ್ನುತ್ತಾರೆ. ಹೀಗೆ ' ಅಕಾರಾಂತ ' ಶಬ್ದಗಳ ವಿಭಕ್ತಿಯ ರೂಪಗಳು ನಂಬರ ೧ ರಲ್ಲಿ ಕೊಟ್ಟಿರುತ್ತವೆ. ನಂಬರ ೧ ನೋಡಿರಿ (ಪುಟ ೩೪).

ಸಂಸ್ಕೃತದಲ್ಲಿ ಪ್ರತ್ಯಯದ ಸಹಾಯದಿಂದ ವಿಭಕ್ತಿಯನ್ನು ಸ್ಪಷ್ಟ ರೀತಿಯಿಂದ ತೋರಿಸಲಿಕ್ಕೆ ಬರುತ್ತದೆ.

ನಂಬರ ೧ ರೊಳಗೆ ಎಡಭಾಗದ Column ದೊಳಗೆ ವಿಭಕ್ತಿಯನ್ನು ತೋರಿಸುವ ಸಂಖ್ಯೆಗಳಿಗೆ (೧, ೨, ೩, ವಗೈರೆ) ಅದರಂತೆ ಬಲಭಾಗದ column ದಲ್ಲಿ ವಿಭಕ್ತಿಗಳ ಹೆಸರು ಬರೆದಿರುತ್ತವೆ. (प्रथमा, द्वितीया ವಗೈರೆ). ಈದರಮೇಲಿಂದ—

बालकः ಇದು प्रथमा ವಿಭಕ್ತಿ ಅದೆ.

बालकम् , गणेशम् ಇದು द्वितीया ವಿಭಕ್ತಿಯು.

बालकस्य ಇದು षष्टी, ಮತ್ತು हस्ते ಇದು सप्तमी.

೧ ರಿಂದ ೪೯ ನಂಬರಗಳ ಯೋಜನೆಯು ಚನ್ನಾಗಿ ಲಕ್ಷದಲ್ಲಿ ತಕ್ಕೊಳ್ಳಬೇಕು. ಅವುಗಳಲ್ಲಿ ಮುಖ್ಯ ಶಬ್ದ, पुल्लिंगी, स्त्रीलिंगी, नपुंसकलिंगी; अकारांत, इकारांत ವಗೈರೆ नाम, सर्वनाम ಇತ್ಯಾದಿ ಶಬ್ದಗಳ ವಿಭಕ್ತಿಗಳ ರೂಪಗಳು ಒಂದೇ ಕಡೆಯಲ್ಲಿ ಸಿಗುವವು.

(ಈ ಪ್ರಕಾರ ಅಂತ್ಯದಲ್ಲಿ इ, उ, ऋ ವಗೈರೆ ಇದ್ದರೆ ಆ ಶಬ್ದಗಳಿಗೆ इकारांत, उकारांत, ऋकारांत ವಗೈರೆ ಅನ್ನುತ್ತಾರೆ).

ಈ ಶಬ್ದಾರ್ಥಗಳ ವಿಭಕ್ತಿಗಳ ರೂಪಗಳು ಬೇರೆ ಸ್ಥಳದಲ್ಲಿ ವಪ್ಪ ಸಂಖ್ಯೆಗಳ ಹತ್ತರ ಸಿಗುವವು.

ವಿಭಕ್ತಿಗಳ ಉಪಯೋಗವು ಸಂಸ್ಕೃತದಲ್ಲಿ ಕನ್ನಡದಂತೆಯೇ ಇರುತ್ತದೆ. ಭಾಷಾಂತರ ಮಾಡುವಾಗ ಇದು ಲಕ್ಷದಲ್ಲಿ ಬರುತ್ತದೆ.

वचन

(ಬೋರ್ಡಿನಮೇಲೆ ಬರೆಯುವಾ)

चाक्य.	कर्ता·	कर्म-	क्रियापद.
(संस्कृत)	चालकः	गणेशम्	नमति,
(ಕನ್ನಡ)	ಹುಡುಗನು	ಗಣೇಶನನ್ನು	ನಮಿಸುತ್ತಾನೆ

ಇಲ್ಲಿ ಹುಡುಗನು, ಒಂದಿರೆ, ಒಬ್ಬ
ಹುಡುಗನು ... ... एकवचन

ಒಂದರಕ್ಕಿಂತಾ ಹೆಚ್ಚಿದ್ದರೆ
೨, ೩, ೪ ವಗೈರೆ ಹಡುಗರು ... ... बहुवचन

ಕನ್ನಡದಲ್ಲಿ ವಚನಗಳು ಎರಡೇ ಇರುತ್ತವೆ, ಏಕವಚನ, ಬಹುವಚನ ಆದರೆ ಸಂಸ್ಕೃತದಲ್ಲಿ ವಚನಗಳು ಮೂರು ಇರುತ್ತವೆ; एकवचन, द्विवचन ಮತ್ತು बहुवचन, ಇದು ಯಾಕೆ? ಕಾರಣವೇನಂದರೆ, ಪದಾರ್ಥ (೧)? ಅಥವಾ (೨)? ಅಥವಾ ಎರಡರಕ್ಕಿಂತಾ ಹೆಚ್ಚು ೩, ೪, ೫ ...)? ಇದು ಸ್ಪಷ್ಟ ತಿಳಿಯ ಬೇಕು, ಆದ್ದರಿಂದ ಸಂಸ್ಕೃತದಲ್ಲಿ ಮೂರು ವಚನಗಳಿಗೆ ಮೂರು ಬೇರೆ ಬೇರೆ ರೂಪಗಳು ತೋರಿಸುತ್ತಾರೆ (ನಂಬರ ೯ ನೋಡಿರಿ.)

(೧)	(೨)	(೩, ೪, ೫ ...)	
ಏಕವಚನ	ದ್ವಿವಚನ	ಬಹುವಚನ	
चालकः	चालकौ	बालकाः	(प्रथमा)

ಈ ೩ ಪ್ರಕಾರದ ಕರ್ತೃ ಸಲುವಾಗಿ ಕ್ರಿಯಾಪದಗಳ ರೂಪಗಳು ಸಹ ೩ ಪ್ರಕಾರದವು ಬೇಕು — (ನಂಬರು ೪೨ ಸೋಡಿರಿ)

(बालकः) (पठति) । (बालकौ) पठतः (बालकाः) पठन्ति ।

ಇದರ ಮೇಲಿಂದ ಕರ್ತೃವಿನ ವಚನದಲ್ಲಿ ಹೆಚ್ಚು ಕಡಿಮೆ ಆದರೆ ಕ್ರಿಯಾಪದ ದಲ್ಲಿ ಸಹ ಹೆಚ್ಚು ಕಡಿಮೆ ಆಗುತ್ತದೆ.

पुरुष

ಈಗ ಕರ್ತೃವಿನ ಪುರುಷ ದಲ್ಲಿ ಹೆಚ್ಚು ಕಡಿಮೆ ಮಾಡಿ ನೋಡುವಾ.

ಬೋರ್ಡಿನ ಮೇಲೆ ಬರೆಯುವಾ. ನಾನು ಓದುತ್ತೇನೆ ; ನೀನು ಓದುತ್ತಿ ; ಹುಡುಗನು ಓದುತ್ತಾನೆ. ಇದರಮೇಲಿಂದ ಪುರುಷದಲ್ಲಿ ಹೆಚ್ಚು ಕಡಿಮೆ ಇದ್ದರೆ ಕ್ರಿಯಾಪದದಲ್ಲಿಸಹ ಕನ್ನಡದಲ್ಲಿ ಹೆಚ್ಚು ಕಡಿಮೆಯಾಗುತ್ತದೆ.

ಸಂಸ್ಕೃತದಲ್ಲಿಸಹ ಪುರುಷದಲ್ಲಿ ಹೆಚ್ಚು ಕಡಿಮೆ ಇದ್ದರೆ ಕ್ರಿಯಾಪದದಲ್ಲಿ ಸಹ ಹೆಚ್ಚು ಕಡಿಮೆ ಆಗುತ್ತದೆ.

	प्रथमपुरुष	द्वितीयपुरुष	तृतीयपुरुष
(ಕನ್ನಡ)	(ನಾನು) ಓದುತ್ತೇನೆ	(ನೀನು) ಓದುತ್ತಿ	(ಅವನು) ಓದುತ್ತಾನೆ,
(ಸಂಸ್ಕೃತ)	(अहं) पठामि ।	(त्वं) पठसि	(सः) पठति.

ಈಗ ಒಂದೇ ವೇಳೆಯಲ್ಲಿ ಕರ್ತೃವಿನ ವಚನ ಮತ್ತು ಪುರುಷ ಈ ಎರಡ ರೊಳಗೆ ಹೆಚ್ಚು ಕಡಿಮೆ ಮಾಡಿ, ಕರ್ತೃ ಮತ್ತು ಕ್ರಿಯಾಪದವನ್ನು ಜೋಡಿಸುವದು ಹೆಗಾಗುತ್ತದೆಂಬುದು ನೋಡುವಾ.

(ನಂಬರ ೩೪ ನೋಡಿರಿ) (ಬೋರ್ಡಿನ ಮೇಲೆ ದೂರ ದೂರ ಮಾಡಿ ಬರೆಯುವಾ.)

	एकवचनम् (१)	द्विवचनम् (२)	बहुवचनम् (३, ४,...)
प्र. पु.	(अहम्) पठामि ।	(आवाम् पठावः) ।	(वयम्) पठामः ।
द्वि. पु.	(त्वम् पठसि) ।	(युवाम् पठथः ।	(यूयम्) पठथ ।
तृ. पु.	(सः) पठति ।	(तौ) पठतः ।	(ते) पठन्ति ।
	(बालकः)	(बालकौ)	(बालकाः)

ಈಗ ನಾವು ೩ ವಚನಗಳನ್ನು ಮತ್ತು ಮೂರು ಪುರುಷಗಳನ್ನು ತಯಾರ ಮಾಡಿದ್ದೇವೆ. ಈ ರೂಪಗಳನ್ನು ವಿದ್ಯಾರ್ಥಿ ಕಡೆಯಿಂದ ಮೇಲಿಂದಮೇಲೆ ಪಾಠ ಮಾಡಿಸಿಕೊಳ್ಳಬೇಕು. ಇನ್ನು ಮುಂದೆ ಸಹ, ಯಾವ ವಿಷಯ ಇದ್ದರೂ ಮನಸ್ಸಿನ ಮೇಲೆ ಬಿಂಬಿಸಲಿಕ್ಕೆ ಈ ಪದ್ಧತಿಯನ್ನೇ ಉಪಯೋಗಿಸಬೇಕು.

ಲಿಂಗ

ಈಗ ನಾವು ಲಿಂಗದ ವಿಚಾರ ಮಾಡುವಾ.

(೧) "ಹುಡುಗನು **ನಿಲ್ಲುತ್ತಾನೆ**", "ಹುಡಿಗಿಯು **ನಿಲ್ಲುತ್ತಾಳೆ**", "ಅರಣ್ಯವು **ನಿಲ್ಲುತ್ತದೆ**".

ಕರ್ತೃವಿನ ಜಾತಿಯಂತೆ ಕನ್ನಡದಲ್ಲಿ ಲಿಂಗವು ಬದಲಾಗುತ್ತದೆ. ಆದರೆ ಸಂಸ್ಕೃತದಲ್ಲಿ ಲಿಂಗಭೇದದಂತೆ ಕ್ರಿಯಾಪದದ ರೂಪಗಳಲ್ಲಿ ಏನೂ ಹೆಚ್ಚು ಕಡಿಮೆ ಆಗುವದಿಲ್ಲ.

(पुल्लिंग) सः बालकः तिष्ठति । (स्त्री.) सा बालिका तिष्ठति ।
(नपुंस.) तत् अरण्यम् तिष्ठति ।

ಸಂಸ್ಕೃತ ಮತ್ತು ಕನ್ನಡದಲ್ಲಿ ಲಿಂಗವಿಚಾರದ ಬಗ್ಗೆ ಮೇಲೆ ತೋರಿಸಿದಂತೆ ಭೇದವಿದೆ. ಇದನ್ನು ಲಕ್ಷ್ಯದಲ್ಲಿಡಬೇಕು.

ವ್ಯಾಕರಣದಲ್ಲಿ ಪ್ರವೇಶ ಹ್ಯಾಗೆ ಮಾಡಬೇಕೆಂಬುದು ತೋರಿಸಲಿಕ್ಕೆ ಕನ್ನಡ ಪುರುಷ, ವಚನ, ಲಿಂಗ ಇತ್ಯಾದಿಗಳ ರೂಪಗಳಲ್ಲಿ ಸಂಸ್ಕೃತ ಪುರುಷ, ವಚನ, ಲಿಂಗ ಇತ್ಯಾದಿಗಳ ರೂಪಗಳಲ್ಲಿರುವ ಸಾಮ್ಯ ಮತ್ತು ಭೇದಗಳನ್ನು ಉದಾಹರಣೆ ಸಹಿತ ಮೇಲೆ ತೋರಿಸಿದ್ದೇವೆ. ಈ ಎರಡು ಭಾಷೆಯೊಳಗಿನ ಸಾಮ್ಯ ಮತ್ತು ಭೇದಗಳಕಡೆಗೆ **ಯಾವಾಗಲು** ಲಕ್ಷ್ಯ ಕೊಡುತ್ತಿರಬೇಕು.

ಒಂದು ವೇಳೆ ಒಂದೇ ವಿಷಯವನ್ನು ಕಲಿಸುವದನ್ನು ನಿಶ್ಚಯಿಸಿ ಅಲ್ಲಿ ನಿಲ್ಲಬೇಕು, ಉದಾಹರಣಾರ್ಥ—"पद्" ದ ವಿಷಯ ಮಾಹಿತಿ ಮಾಡಿಕೊಳ್ಳುವದಿದ್ದರೆ

ಒಂಬತನೇ ಪಾಠದಿಂದ ಮುಂದೆ ಹೋಗುತ್ತಾ नमति, गच्छति, पठति ಇತ್ಯಾದಿ ರೂಪಗಳ ನಂತರ ೬ ನೇ ಪಾಠದಲ್ಲಿ लभते ಈ ಬೇರೆ ರೂಪವು ಪ್ರಥಮತಕ್ಕೆ ಕಾಣುತ್ತದೆ. ಈ ಸಂಬಂಧ ನಿಂತು ಆತ್ಮನೇಪದ ಪರಸ್ಮೈಪದ ಈ ವಿಷಯಕಡೆಗೆ ವಿದ್ಯಾರ್ಥಿಯ ಲಕ್ಷ್ಯ ಎಳೆಯಬೇಕು ಮತ್ತು ನಂಬರ ೪೭, ೪೮ ಇವುಗಳ ಸಹಾಯದಿಂದ "पद्" ಎಂಬ ವಿಷಯವನ್ನು ಸ್ಪಷ್ಟಮಾಡಬೇಕು.

गण—ಈ ವಿಷಯವನ್ನು ಬೇರೆ ಎಲ್ಲ ವಿಷಯಗಳ ನಂತರ ತಕ್ಕೊಳ್ಳ ಬೇಕು. ಕಲಿಸಿದ ಯಾವ ವಿಷಯವಾದರೂ ಚನ್ನಾಗಿ ತಯಾರಾದ ನಂತರ ಮುಂದೆ ಹೇಳಬೇಕು.

ಶಿಕ್ಷಣಶಾಸ್ತ್ರದಲ್ಲಿ ಪಾರಂಗತರಿರುವ ಈಗಿನ ಶಿಕ್ಷಕರಿಗೆ ಮೇಲೆ ಕೊಟ್ಟ ಸೂಚನೆಗಳಿಗಿಂತ ಹೆಚ್ಚಿನ ಸೂಚನೆ ಕೊಡುವ ಅಗತ್ಯ ಕಾಣುವದಿಲ್ಲ.

शुभम् ।

ಕನ್ನಡ ಶಬ್ದಕೋಶ—(ಪಾಠಾನುಕ್ರಮಗಳು)

(संस्कृत)	(ಕನ್ನಡ)
	೧
प्रथमः पाठः	ಮೊದಲನೆಯ ಪಾಠ
बालकः	ಹುಡುಗನು
नमति	ನಮಸ್ಕಾರ ಮಾಡುತ್ತಾನೆ
बालकस्य	ಹುಡುಗನ
नाम, नामधेयम्	ಹೆಸರು
तस्य	ಅವನ
हस्ते	ಕೈಯಲ್ಲಿ
पुस्तकम्	ಪುಸ್ತಕವು
अस्ति	ಉಂಟು
पाठशालाम्	ಶಾಲೆಗೆ
गच्छति	ಹೋಗುತ್ತಾನೆ
गुरुः	ಉಪಾಧ್ಯಾಯನು
गुरुम्	ಉಪಾಧ್ಯಾಯನನ್ನು
पठति	ಓದುತ್ತಾನೆ
च	ಮತ್ತು
तेन	ಆದ್ದರಿಂದ
संतुष्टः	ಸಂತುಷ್ಟ
भवति	ಆಗುತ್ತಾನೆ
नमः	ನಮಸ್ಕಾರವು !
गुरवे	ಉಪಾಧ್ಯಾಯನಿಗೆ
	೨
द्वितीयः पाठः	ಎರಡನೆಯ ಪಾಠ
कः ?	ಯಾವನು, ಯಾರು ?
कस्य ?	ಯಾರ ?
एषः	ಈ
अयोध्यायाः	ಅಯೋಧ್ಯೆಯ
राजा	ರಾಜನು
पिता	ತಂದೆ
माता	ತಾಯಿ
का ?	〃
तस्मात्	ಆದುದರಿಂದ
भार्या	ಹೆಂಡತಿಯು
मातरम्	ತಾಯಿಯನ್ನು
पितरम्	ತಂದೆಯನ್ನು
सः	ಅವನು
मातापितरौ	ತಾಯಿ-ತಂದೆಗಳನ್ನು
मातापितृभ्याम्	ತಾಯಿ-ತಂದೆಗಳಿಗೆ
पुत्रः	ಪುತ್ರನು, ಮಗನು
	೩
तृतीयः पाठः	ಮೂರನೆಯ ಪಾಠ
अपि	ಕೂಡ–ಸಹ
अपरः	ಬೇರೆ
अपरा	ಇನ್ನೊಬ್ಬಳು
प्रियः	ಪ್ರಿಯನು
भ्राता	ಅಣ್ಣನು
	೪
चतुर्थः पाठः	ನಾಲ್ಕನೆಯ ಪಾಠ
पित्रे	ತಂದೆಗೆ
कीदृशः	ಯಾವಪ್ರಕಾರದ?
सहोदरः	ಒಡಹುಟ್ಟಿದವನು

कथम् एतत्?	ಇದು ಹೇಗೆ?
परन्तु	ಆದರೆ
तु	ಆದರೆ
किन्तु	ಆದರೆ
सापत्नः	ಸವತಿಯಮಗನು
तथापि	ಆದರೂ
द्वौ अपि	ಇಬ್ಬರೂ
नृपस्य	ರಾಜನ
नृपाय	ರಾಜನಿಗೆ
अतीव	ಬಹಳ

೫

पञ्चमः पाठः	ಐದನೆಯ ಪಾಠ
राजा	ರಾಜನು
अयोध्यायाम्	ಅಯೋಧ್ಯೆಯಲ್ಲಿ
राज्यम् करोति	ರಾಜ್ಯವನ್ನು ಆಳುತ್ತಾನೆ
प्रजाः	ಪ್ರಜೆಗಳನ್ನು
रक्षति	ರಕ್ಷಿಸುತ್ತಾನೆ
एका	ಒಬ್ಬಳು
तृतीया	ಮೂರನೆಯವಳು
तस्याः	ಅವಳ
द्वितीयः	ಎರಡನೆಯವನು
तथा च	ಹಾಗೆಯೇ

೬

षष्ठः पाठः	ಆರನೆಯ ಪಾಠ
चत्वारः	ನಾಲ್ಕು
सन्ति	ಇರುತ್ತಾರೆ
सर्वे	ಎಲ್ಲರು
शूराः	ಶೂರರು
गुणवन्तः	ಗುಣವಂತರು
तेषाम्	ಅವರೊಳಗೆ
सर्वस्य	ಎಲ್ಲ ಜನರ
विशेषतः	ವಿಶೇಷವಾಗಿ
बाल्यात् प्रभृति	ಚಿಕ್ಕಂದಿನಿಂದ
विना	ಹೊರತು
भक्षयति	ತಿನ್ನುತ್ತಾನೆ
निद्राम् लभते	ನಿದ್ದೆ ಮಾಡುತ್ತಾನೆ
अश्वम् आरोहति	ಕುದುರೆಯನ್ನು ಏರುತ್ತಾನೆ
मृगयायै गच्छति	ಬೇಟೆಗೆ ಹೋಗುತ್ತಾನೆ
चापम् गृहीत्वा	ಬಿಲ್ಲನ್ನು ತೆಗೆದುಕೊಂಡು
तम् अनुगच्छति	ಅವನನ್ನು ಹಿಂಬಾಲಿಸುತ್ತಾನೆ
चतुर्भिः	ನಾಲ್ವರಿಂದ
प्रसन्नः	ಪ್ರಸನ್ನನು
यदा–तदा	ಯಾವಾಗ–ಆಗ

೭

सप्तमः पाठः	ಏಳನೆಯ ಪಾಠ
एकदा	ಒಮ್ಮೆ
अगच्छत्	ಹೋದನು
राजभवनम्	ಅರಮನೆ
किंकरम्	ಸೇವಕನಿಗೆ
गत्वा	ಹೋಗಿ
अवदत्	ಹೇಳಿದನು
अहम् अस्मि	ನಾನು ಇದ್ದೇನೆ
अहम् वसामि	ನಾನು ವಾಸಿಸುತ್ತೇನೆ
वने	ಅರಣ್ಯದಲ್ಲಿ
वनात्	ಅರಣ್ಯದಿಂದ
अद्य	ಈ ಹೊತ್ತು
आगतः अस्मि	ಬಂದಿದ್ದೇನೆ
द्रष्टुम् इच्छामि	ನೋಡಲ-ಪೇಕ್ಷಿಸುತ್ತೇನೆ

कश्चित्	ಯಾವನೊಬ್ಬ
मुनिः	ಋಷಿಯು
द्वारे	ಬಾಗಿಲದಲ್ಲಿ
तिष्ठति	ನಿಂತಿರುತ್ತಾನೆ
देव	ಸ್ವಾಮೀ, ದೊರೆಗಳೇ
श्रुत्वा	ಕೇಳಿ
देवः प्रमाणम्	ಸ್ವಾಮಿಯ ಚಿತ್ತ
उत्थाय	ಎದ್ದು
बहिः	ಹೊರಗೆ
अर्घ्येण	ಪೂಜಾ ಸಾಮುಗ್ರಿಯಿಂದ
अपूजयत्	ಪೂಜೆ ಮಾಡಿದನು
अविशत्	ಸೇರಿದನು

೮

अष्टमः पाठः	ಎಂಟನೆಯ ಪಾಠ
आदरेण	ಆದರದಿಂದ
कुशलम्	ಕ್ಷೇಮವನ್ನು
अपृच्छत्	ಕೇಳಿದನು
महामुने	ಮಹರ್ಷಿಯೆ
आगमनस्य	ಬರುವುದಕ್ಕೆ
कारणम्	ಕಾರಣ
किम्	ಏನು
तव कामः	ನಿನ್ನ ಇಚ್ಛೆ
मम कामः	ನನ್ನ ಇಚ್ಛೆ
अयम्	ಈ
यत्र	ಎಲ್ಲಿ
तत्र	ಅಲ್ಲಿ
राक्षसौ	ಇಬ್ಬರು ರಾಕ್ಷಸರು
यज्ञस्य	ಯಜ್ಞಕ್ಕೆ
विघ्नकरौ	ಅಡ್ಡಿ ಪಡಿಸುವವರು
रुधिरेण	ರಕ್ತದಿಂದ
वेदीम्	ಯಜ್ಞಸ್ಥಳವನ್ನು
सिञ्चतः	ಸಿಂಪಡಿಸುತ್ತಾರೆ
व्रत-भङ्गः	ವ್ರತಭಂಗವು
यदि एवम्,	ಹೀಗಿದ್ದರೆ
भवान् दण्डयति	ನೀನು ದಂಡಿಸುತ್ತಿ

೯

नवमः पाठः	ಒಂಬತ್ತನೆಯ ಪಾಠ
प्रत्यभाषत	ಉತ್ತರವಿತ್ತನು
क्रोधेन	ಸಿ(ಶಿ)ಟ್ಟಿನಿಂದ
नश्यति	ನಾಶವಾಗುತ್ತದೆ
प्रयच्छ	ಕೊಡು
दण्डयिष्यति	ದಂಡಿಸುವನು
ख्यातः भविष्यति	ಪ್ರಖ್ಯಾತನಾಗುವನು
रामेण सह	ರಾಮನ ಸಂಗಡ
गमिष्यामि	ಹೋಗುವೆನು
ज्येष्ठः	ಹಿರಿಯವನು
वचनम्	ಮಾತು, ನುಡಿ
दुःखितः	ದುಃಖಿತನಾಗಿ
बालकः एव	ಕೇವಲ ಹುಡುಗನು
एकाकी	ಒಬ್ಬನೇ
शक्तः	ಸಮರ್ಥನು
युद्धम् कर्तुम्	ಯುದ್ಧ ಮಾಡಲಿಕ್ಕೆ
युद्धम् करिष्यामि	ಯುದ್ಧ ಮಾಡುವೆನು
मे कथय	ನನಗೆ ಹೇಳು
के ?	ಯಾರು ?
बलम्	ಶಕ್ತಿಯು
अद्यापि	ಇನ್ನೂ

೧೦

दशमः पाठः	ಹತ್ತನೆಯ ಪಾಠ
अभाषत	ಹೇಳಿದನು
दक्षिणस्याम् दिशायाम्	ದಕ್ಷಿಣ ದಿಕ್ಕಿನಲ್ಲಿ
नगरी	ಪಟ್ಟಣವು
सहायाः	ಸಹಾಯ ಮಾಡುವವರು
विधिना	ಬ್ರಹ್ಮದೇವರಿಂದ
वरः	ವರವು
दत्तः (अस्ति)	ಕೊಡಲ್ಪಟ್ಟಿತು
मत्तः	ಕೊಬ್ಬಿದವನಾಗಿ
सज्जनान्	ಸಜ್ಜನರನ್ನು
पीडयति	ಬಾಧಿಸುತ್ತಾನೆ
प्रवर्तयति	ಪ್ರೇರಿಸುತ್ತಾನೆ

೧೧

एकादशः पाठः	ಹನ್ನೊಂದನೆಯ ಪಾಠ
वदति	ಹೇಳುತ್ತಾನೆ
चतुर्णाम्	ನಾಲ್ವರೊಳಗೆ
दास्यामि	ಕೊಡುವೆನು
शीघ्र-कोपः	ಶೀಘ್ರ ಕೋಪಿಯು
कुप्यति	ಕೋಪಿಸುತ್ತಾನೆ
नेत्रे	ಕಣ್ಣುಗಳು
आरक्ते	ಕೆಂಪು
पूर्वम्	ಮೊದಲು
त्वम् अवदः	ನೀನು ಹೇಳಿದ
इदानीम्	ಈಗ
न उचितम्	ಯೋಗ್ಯವಲ್ಲ
यथागतम्	ಬಂದಹಾಗೆ
प्रतिज्ञा	ಪ್ರತಿಜ್ಞೆಯು
मिथ्या	ಸುಳ್ಳು
मिथ्या-प्रतिज्ञः	ಸುಳ್ಳಾಡುವವ
सुखी	ಸುಖಿಯು
इति उक्त्वा	ಹೀಗೆ ಹೇಳಿ

೧೨

द्वादशः पाठः	ಹನ್ನೆರಡನೆಯ ಪಾಠ
कुलगुरुः	ಕುಲಗುರು
सत्य-प्रतिज्ञः	ಸತ್ಯಸಂಧನು
क्षत्रियः	ಕ್ಷತ್ರಿಯನು
स्वधर्मः	ಸ್ವಂತ ಧರ್ಮ
मा त्यज	ಬಿಡ ಬೇಡ
रक्षणं कुरु	ಕಾಪಾಡು
रक्षितः	ರಕ್ಷಿತನು
समर्थाः	ಸಮರ್ಥರು
विविधानि	ಹಲವು ಬಗೆಯ
अस्त्राणि	ಅಸ್ತ್ರಗಳನ್ನು
जानाति	ಬಲ್ಲನು
हिताय	ಹಿತಕ್ಕೆ
संशयम् त्यज	ಸಂಶಯವನ್ನು ಬಿಡು
प्रतिज्ञा-भङ्गः	ಪ್ರತಿಜ್ಞಾಭಂಗವು
भयम्	ಭಯವು
विद्यते	ಇರುವದು-ಇದೆ

೧೩

त्रयोदशः पाठः	ಹದಿಮೂರನೆಯ ಪಾಠ
माम् क्षमस्व	ನನ್ನನ್ನು ಕ್ಷಮಿಸು
अनेन	ಇದರಿಂದ
आह्वयति	ಕರೆಯುತ್ತಾನೆ
शीघ्रम्	ಬೇಗನೆ
अग्रतः	ಮುಂದೆ
पृष्ठतः	ಹಿಂದೆ

हस्तौ उद्यम्य	ಕೈಗಳನ್ನೆತ್ತಿ
आशीर्वचनम्	ಆಶೀರ್ವಾದವು
चित्रे	ಚಿತ್ರದಲ್ಲಿ

೧೪

चतुर्दशः पाठः	ಹದಿನಾಲ್ಕನೆಯ ಪಾಠ
श्यामलः	ಸಾಮವರ್ಣದವ
गौरः	ಬಿಳಿಯನು, ಕೆಂಪು ವರ್ಣದವ
अञ्जलिम् बद्ध्वा	ಕೈ ಮುಗಿದು
दक्षिणतः	ಬಲಗಡೆಯಲ್ಲಿ
वामतः	ಎಡಗಡೆಯಲ್ಲಿ
पार्श्वतः	ಹತ್ತರ
सिंहासनम्	ಸಿಂಹಾಸನವು
वर्तते	ಉಂಟು
उपरि	ಮೇಲೆ
छत्रम्	ಛತ್ರವು
चामरम्	ಚಾಮರವು
अन्यत्	ಇನ್ನೊಂದು
राजचिह्नानि	ರಾಜಚಿನ್ಹಗಳು
दृश्यन्ते	ಕಾಣಲ್ಪಡುತ್ತವೆ, ಕಾಣುತ್ತವೆ

೧೫

पञ्चदशः पाठः	ಹದಿನೈದನೆಯ ಪಾಠ
शीर्षे, मस्तके	ತಲೆಯ ಮೇಲೆ
	ಕಿರೀಟವು
कण्ठे	ಕಂಠದಲ್ಲಿ
हारः	ಕಂಠಮಾಲೆಯು
	ಬೆನ್ನ ಮೇಲೆ
तूणीरः	ಬತ್ತಳಿಕೆಯು
बाणाः	ಬಾಣಗಳ
बलवान्	ಬಲವಂತನು
जटाः	ಜಡೆಗಳು
वर्तन्ते	ಇವೆ
तयोः मुखयोः	ಅವರಿಬ್ಬರ ಮುಖದ ಮೇಲೆ
प्रभूताः केशाः	ಬಹಳ ಕೂದಲು
कूर्चः	ಗಡ್ಡವು
दीर्घः—ह्रस्वः	ಉದ್ದ—ಮೋಟು, ಗಿಡ್ಡ
धवलः—कृष्णः	ಬಿಳೀ—ಕರೀ
आजिनम्	ಕೃಷ್ಣಾಜಿನವು
क्षौमम्	ರೇಶಮಿ ಬಟ್ಟೆ
कार्पासम्	ಹತ್ತಿಯ
तादृशः	ಅಷ್ಟು
शिरोवस्त्रम्	ರುಮಾಲು

೧೬

षोडशः पाठः	ಹದಿನಾರನೆಯ ಪಾಠ
दत्तः (आस्ति)	ಕೊಡಲ್ಪಟ್ಟಿನು
प्रस्थितः	ಹೊರಟನು
याति	ಹೋಗುತ್ತಾನೆ
धनुः	ಬಿಲ್ಲು
क्रोश–द्वयम्	ಎರಡು ಹರದಾರಿ
पश्यन्ति	ನೋಡುತ್ತಾರೆ
वत्स	ಬಾಲಕನೇ
शोभाम् पश्य	ಶೋಭೆಯನ್ನು ನೋಡು, ಸೊಗಸನ್ನು ನೋಡು,
अभिभाषते	ಮಾತಾಡುತ್ತಾನೆ
इयम् नदी	ಈ ನದಿಯು
अस्याः नद्याः	ಈ ನದಿಯ
निर्मलम्	ಸ್ವಚ್ಛ
जलम्	ನೀರು

೧೭

सप्तदशः पाठः	ಹದಿನೇಳನೆಯ ಪಾಠ
अस्याम्	ಇವಳಲ್ಲಿ
स्वच्छम्	ತಿಳಿಯಾದ
गृहाण	ತೆಗೆದುಕೊ
अस्त्रविद्या	ಅಸ್ತ್ರವಿದ್ಯೆಯು
शिक्षस्व	ಕಲಿ
शत्रुः	ಶತ್ರುವು
विजेष्यसे	ಗೆಲ್ಲುವೆ
क्षुधा	ಹಸಿವು
पिपासा	ಬಾಯಾರಿಕೆ
वा	ಅಥವಾ
स्पृश	ಸ್ಪರ್ಶ ಮಾಡು
काल-क्षेपः	ತಡ, ವೇಳೆ ಕಳೆಯೋಣ
शिक्षते	ಕಲಿಯುತ್ತಾನೆ
पश्चिमायाम् दिशायाम्	ಪಶ್ಚಿಮ ದಿಕ್ಕಿನಲ್ಲಿ
अस्तम् गच्छति	ಮುಳುಗುತ್ತಾನೆ
संध्या-कालः	ಸಾಯಂಕಾಲವು
प्रातः	ಬಂದಿತು
वन्दनार्थम्	ವಂದನೆಗಾಗಿ
तीरे	ದಡದಲ್ಲಿ
रात्रिम् नयन्ति	ರಾತ್ರಿಯನ್ನು ಕಳೆಯುತ್ತಾರೆ

೧೮

अष्टादशः पाठः	ಹದಿನೆಂಟನೆಯ ಪಾಠ
शयनम् त्यक्त्वा	ಹಾಸಿಗೆ ಬಿಟ್ಟು
प्रभात-कालः	ಪ್ರಾತಃಕಾಲವು
नक्षत्राणि	ನಕ್ಷತ್ರಗಳು
आकाशे	ಆಕಾಶದಲ್ಲಿ
पूर्वस्याम्-दिशायाम्	ಪೂರ್ವ ದಿಕ್ಕಿನಲ್ಲಿ
उदयति	ಹುಟ್ಟುತ್ತಾನೆ
भास्करः	ಸೂರ್ಯನು
दिनकृत्यानि	ದಿನದ ಕೆಲಸಗಳು
आरभस्व	ಆರಂಭ ಮಾಡು
स्नानम्	ಸ್ನಾನವು
तदनन्तरम्	ಆ ಬಳಿಕ
वनम् गच्छन्तः	ಕಾಡಿಗೆ ಹೋಗುವವರು
उद्यतौ	ಸಿದ್ಧರು
संगमः	ಸಂಗಮವು
मार्गे	ಮಾರ್ಗದಲ್ಲಿ
प्रभात करणीयानि	ಮುಂಜಾನೆಯ ಕೆಲಸಗಳು

೧೯

एकोनविंशः पाठः	ಹತ್ತೊಂಬತ್ತನೆಯ ಪಾಠ
दारुणम्	ಭಯಂಕರ
जनपदः	ದೇಶವು
संपन्नः	ಸಮೃದ್ಧ
धनधान्येन	ಧನಧಾನ್ಯದಿಂದ
नित्यम्	ಯಾವಾಗಲೂ
त्रासयते	ಬೆದರಿಸುತ್ತಾನೆ
विनाशयति	ನಾಶಮಾಡುತ್ತಾನೆ
मार्गम् आवृत्य	ಹಾದಿಯನ್ನು ಅಡ್ಡಗಟ್ಟಿ
उत्सादितम्	ಹಾಳು ಮಾಡಲ್ಪಟ್ಟ
शक्तः अस्ति	ಸಮರ್ಥನಿದ್ದಾನೆ
दुष्टा	ದುಷ್ಟಳು

पूर्ववत्	ಮೊದಲಿನಂತೆ
निष्कण्टकम् कुरु	ತೊಂದರೆಯಿಲ್ಲದಂತೆ ಮಾಡು

೨೦

विंशः पाठः	ಇಪ್ಪತ್ತನೆಯ ಪಾಠ
नारी	ಹೆಂಗಸು
कथम् नु मारयेयम्	ಹೇಗೆ ಕೊಲ್ಲಲಿ
मा मैवम्	ಹೀಗೆ ಅಲ್ಲ
परम-दारुणा	ಬಹಳ ಭಯಂಕರಳು
त्वाम् ऋते	ನಿನ್ನ ಹೊರತು
नारी-वधः	ಸ್ತ್ರೀಹತ್ಯೆಯು
शङ्का	ಶಂಕೆಯು, ಸಂಶಯವು
दयाम् अर्हति	ದಯೆಗೆ ಯೋಗ್ಯಳಿದ್ದಾಳೆ
धर्मः	ಧರ್ಮವು
दण्डनम्	ಶಿಕ್ಷೆಯು
निःशङ्कम्	ಅನುಮಾನಿಸದೆ
धर्म-रहिताः	ಧರ್ಮರಹಿತಳು
प्रमाणम्	ಪ್ರಮಾಣವು
ताम् मारय	ಅವಳನ್ನು ಕೊಲ್ಲು

೨೧

एकविंशः पाठः	ಇಪ್ಪತ್ತೊಂದನೆಯ ಪಾಠ
आलेख्यम	ಚಿತ್ರವು
बहवः वृक्षाः	ಬಹಳ ಗಿಡಗಳು ಸ್ಕಂಧಗಳ ಮೇಲೆ
शाखाः	ಕೊಂಬೆಗಳು
पर्णानि	ಎಲೆಗಳು
गणयामि	ಎಣಿಸುತ್ತೇನೆ
दूरे	ದೂರದಲ್ಲಿ
खड्गः	ಕತ್ತಿಯು
फलकः	ಹಲಗೆಯು, ಡಾಲು
अधस्तात्	ಕೆಳಗೆ
पुरस्तात्	ಮುಂದೆ
चाप-धरौ	ಬಿಲ್ಲು ಹಿಡಿದವರು
मौर्वी	ಬಿಲ್ಲಿನ ಹಗ್ಗವು
आरोप्य	ಏರಿಸಿ
संधानम् कृत्वा	ಗುರಿ ಹಿಡಿದು
केवलम्	ಕೇವಲ
सज्जः	ಸಿದ್ಧನು

೨೨

द्वाविंशः पाठः	ಇಪತ್ತೆರಡನೆಯ ಪಾಠ
अधुना	ಈಗ
मृतायाम् तस्याम्	ಅವಳು ಸತ್ತಮೇಲೆ
बहूनि अस्त्राणि	ಬಹಳ ಅಸ್ತ್ರಗಳು
तानि अस्त्राणि	ಆ ಅಸ್ತ್ರಗಳನ್ನು
प्रतिगृह्य	ತೆಗೆದುಕೊಂಡು, ಸ್ವೀಕರಿಸಿ
गच्छामः	ಹೋಗೋಣ
ततः	ಆ ಮೇಲೆ
आश्रम-वासिनः	ಆಶ್ರಮವಾಸಿಗಳು
आश्रमः	ಆಶ್ರಮವು

೨೩

त्रयोविंशः पाठः	ಇಪತ್ಮೂರನೆಯ ಪಾಠ
अतिथिः	ಅತಿಥಿಯು
अतिथि-क्रिया	ಅತಿಥಿ ಸತ್ಕಾರವು

अद्य एव	ಈ ದಿವಸವೇ
(भवान्) दीक्षाम् गृह्णातु	ದೀಕ್ಷೆಯನ್ನು ಪಡೆ
निवारणीयाः	ತೊಡಗಿಸಲ್ಪಡಬೇಕು
षड् दिनानि	ಆರು ದಿನಗಳು
युवाम् रक्षतम्	ನೀವಿಬ್ಬರು ರಕ್ಷಿಸಿರಿ
मौनम्	ಮೌನವ್ರತವು
तपोवनम्	ತಪೋವನವು
अनिद्रौ	(ಇಬ್ಬರು) ನಿದ್ರೆ ಇಲ್ಲದವರು
समाहितः भव	ಜಾಗೃತಿಯಿಂದಿರು
पुरोहितः	ಪುರೋಹಿತನು
अज्वलयत्	ಹೊತ್ತಿಸಿದನು
यथान्यायम्	ಯೋಗ್ಯ ರೀತಿಯಿಂದ
संप्रवर्तितः	ಆರಂಭಿಸಲ್ಪಟ್ಟಿದು
क्षणे	ಕ್ಷಣದಲ್ಲಿ
प्रादुरासीत्	ಉಂಟಾಯಿತು

೨೪

चतुर्विंशः पाठः	ಇಪ್ಪತ್ನಾಲ್ಕನೆಯ ಪಾಠ
परिसरः	ನೆರೆಹೊರೆಯು
आश्रमपदं	ಆಶ್ರಮದ ಸುತ್ತಲಿನ ಜಾಗೆಯು
कुटीराः	ಗುಡಿಸಲುಗಳು
देवालयाः	ಗುಡಿಗಳು
शिखराणि	ಗೋಪುರಗಳು
अनुचराः	ಅನುಚರರು
त्रस्ताः, भीताः	ಹೆದರಿದವರು
पक्षिणः	ಪಕ್ಷಿಗಳು
उड्डयन्ते	ಹಾರುತ್ತವೆ
निर्गमनम्	ಹೊರಗೆ ಬರುವುದಕ್ಕೆ
भयम्	ಭಯವು
विद्यते	ಉಂಟು
ज्या	ಬಿಲ್ಲಿನ ಹಗ್ಗವು
आकर्णम्	ಕಿವಿಯತನಕ
आकृष्य	ಎಳೆದು
क्षिपति, अस्यति	ಬಿಡುತ್ತಾನೆ

೨೫

पञ्चविंशः पाठः	ಇಪ್ಪತ್ತೈದನೆಯ ಪಾಠ
विद्धः	ಚುಚ್ಚಲ್ಪಟ್ಟವನು
अपतत्	ಬಿದ್ದನು
भूमौ	ನೆಲದ ಮೇಲೆ
हनिष्यामि	ಕೊಲ್ಲುವೆನು
समाप्तः	ಮುಗಿದ
कृतार्थः	ಕೃತಾರ್ಥನು
समुपस्थितौ	ಬಳಿಗೆ ಬಂದವರು
यथेष्टम्	ಮನಸ್ಸಿಗೆ ಬಂದಂತೆ
आज्ञापय	ಅಪ್ಪಣೆ ಕೊಡು
शासनम्	ಅಪ್ಪಣೆ
निःशेषम्	ಸಂಪೂರ್ಣವಾಗಿ
अद्भुतम्	ಆಶ್ಚರ್ಯವು
द्रष्टव्यम्	ನೋಡತಕ್ಕಂಥ
मतिः	ಮನಸ್ಸು
अनुसरतम्	ಹಿಂಬಾಲಿಸಿರಿ

೨೬

षड्विंशः पाठः	ಇಪ್ಪತ್ತಾರನೆಯ ಪಾಠ
नौ कथय	ನಮ್ಮಿಬ್ಬರಿಗೆ ಹೇಳು

पूर्वजाय	ಹಿರಿಯವನಿಗೆ
न्यासः इव	ಠೇವಣಿಯಂತೆ ನಂಬಿಕೆಯಿಂದ
अप्रमेयम्	ಬಹಳ
आरोपणम्	ಏರಿಸುವದನ್ನು
के अपि	ಯಾರಾದರೂ
ज्ञातुकामाः	ತಿಳಿಯಲಿಚ್ಛಿಸುವವರು
महाबलः	ಬಲವಂತರು
कतिपयाः	ಹಲವರು
वृण्वन्ति	ಬಯಸುತ್ತಾರೆ
मिथिलाम् उद्दिश्य	ಮಿಥಿಲೆಯ ಕಡೆಗೆ
प्रस्थानम्	ಪ್ರಯಾಣ
मुनि-श्रेष्ठः	ಮುನಿಶ್ರೇಷ್ಠನು
अन्वगच्छत्	ಹಿಂಬಾಲಿಸಿದನು
कौतूहलम्	ಕೌತುಕವು
शृणु	ಕೇಳು
पुरा	ಪೂರ್ವದಲ್ಲಿ

೨೭

सप्तविंशः पाठः	ಇಪ್ಪತ್ತೇಳನೆಯ ಪಾಠ
यज्ञवाटः	ಯಜ್ಞಶಾಲೆ, ಯಜ್ಞಮಂಟಪ
उपागताः	ಬಂದವರು
नाना-देशाः	ಅನೇಕ ದೇಶಗಳು
निवासिनः	ನಿವಾಸಿಗಳು
वेदाध्ययनम्	ವೇದಾಭ್ಯಾಸವು
अध्ययन-शालिनः	ವಿದ್ಯಾತುರ
शोभना	ಒಳ್ಳೆಯದು,
(यज्ञ) समृद्धिः	ಚಲೋ ಯಜ್ಞಸಮೃದ್ಧಿಯು
वत्स्यामः	ವಾಸಮಾಡುವೆವು
विविक्तः	ಏಕಾಂತವಾದ
सलिलायुतः	ನೀರುಳ್ಳ
निवेशम् अकरोत्	ಬಿಡಾರವನ್ನು ಮಾಡಿದನು
अनुप्राप्तः	ಬಂದವನು
स्वीकृत्य	ಸ್ವೀಕರಿಸಿ–ಒಪ್ಪಿ
त्वरितम्	ಬೇಗನೆ–ತಟ್ಟನೆ
निर्विघ्नता	ವಿಘ್ನವಿಲ್ಲದ್ದು
धन्यः	ಧನ್ಯನು
अनुगृहीतः	ಅನುಗ್ರಹಿತನು
उपसदनम्	ಸ್ಥಳವು

೨೮

अष्टाविंशः पाठः	ಇಪ್ಪತ್ತೆಂಟನೆಯ ಪಾಠ
बद्धाञ्जलिः	ಕೈ ಜೋಡಿಸಿ
लोक-विश्रुतौ	ಲೋಕಪ್ರಸಿದ್ಧ
शैवम् धनुः	ಶಿವನ ಬಿಲ್ಲು
द्रष्टुकामौ	ನೋಡಲಿಚ್ಛಿಸುವವರು
कृतकामौ	ಕೃತಾರ್ಥರಾಗಿ
बाढम्	ಹೌದು
प्रासादः	ಅರಮನೆ
कोशागारम्	ಬೊಕ್ಕಸ
निवेदनीयम्	ತಿಳುಹಿಸತಕ್ಕದು

೨೯

एकोनत्रिंशः पाठः	ಇಪ್ಪತ್ತೊಂಬತ್ತನೆಯ ಪಾಠ
आदिष्टाः	ಆಜ್ಞಾಪಿಸಲ್ಪಟ್ಟ
सचिवाः	ಮಂತ್ರಿಗಳು
पिहितम्	ಮುಚ್ಚಲ್ಪಟ್ಟ
निहितानि	ಇಡಲ್ಪಟ್ಟ
अर्गलः	ಅಗಳಿಯು
बहुमूल्यानि	ಬಹಳ ಬೆಲೆಯುಳ್ಳ

वस्तूनि	ವಸ್ತುಗಳು
निर्गलीकृत्य	ಅಗಳಿತೆಗೆದು
अष्टचक्रा	ಎಂಟು ಗಾಲಿಯ
आयसी	ಕಬ್ಬಿಣದ
मञ्जूषा	ಪೆಟ್ಟಿಗೆ
निधाय	ಹಾಕಿ ಇಟ್ಟು
प्राङ्गणम्	ಅಂಗಳವು
पुरतः	ಮುಂದೆ
रज्ज्वा	ಹಗ್ಗದಿಂದ
कथंचन	ಹ್ಯಾಗಾದರೂ
समवहन्	ಎಳೆದರು
आनीतम्	ತರಲ್ಪಟ್ಟ
तोलनम्	ಯತ್ತುವಿಕೆ
पूरणम्	ಕೂಡಿಸುವುದು, ತೊಡಿಸುವದು
यतिष्ये	ಪ್ರಯತ್ನ ಮಾಡುವೆನು

೩೦

त्रिंशः पाठः	ಮೂವತ್ತನೆಯ ಪಾಠ
माधुर्यम्	ಸೌಂದರ್ಯವು
दृश्यम्	ನೋಟವು
परस्तात्	ಮುಂದುಗಡೆ
रम्यम्	ರಮ್ಯ
उपवनम्	ಉಪವನವು
मन्दिरम्	ಮಂದಿರವು
स्तम्भाः	ಖಂಬಗಳು
सोपानम्	ಮೆಟ್ಟಲು
स्फटिक-मयानि	ಸ್ಫಟಿಕಮಯವು
प्रवेशे	ಪ್ರವೇಶದಲ್ಲಿ
वृद्धः	ಮುದುಕನಾದ
विस्मितः इव	ಆಶ್ಚರ್ಯ ಪಟ್ಟಂತೆ
हर्षिता	ಸಂತೋಷ ಪಟ್ಟವಳು
हस्त-प्रक्षेपात्	ಕೈಯೆತ್ತಿದುದರಿಂದ
विस्मयन्ते	ಆಶ್ಚರ್ಯಪಡುತ್ತಾರೆ
लीलया	ಲೀಲೆಯಿಂದ
मध्ये भग्नम्	ಮಧ್ಯದಲ್ಲಿ ಮುರಿದದ್ದು
किञ्चित्	ಸ್ವಲ್ಪ

೩೧

एकत्रिंशः पाठः	ಮೂವತ್ತೊಂದನೆಯ ಪಾಠ
अहो बत	ಅಹಾಹಾ !
महत् चित्रम्	ಬಹು ಆಶ್ಚರ್ಯವು
वीर्यम्	ಪರಾಕ್ರಮವು
तर्कितम्	ಊಹಿಸಲ್ಪಟ್ಟದ್ದು
आसाद्य	ಹೊಂದಿ
कीर्तिः	ಕೀರ್ತಿಯು
वर्धयिष्यति	ಹೆಚ್ಚಿಸುತ್ತಾಳೆ
अस्माकम्	ನಮ್ಮ
दूताः	ದೂತರು
वृत्तम्	ಸುದ್ದಿಯನ್ನು
आनयन्तु	ತರಲಿ
अहिनोत्	ಕಳುಹಿಸಿದನು

೩೨

द्वात्रिंशः पाठः	ಮೂವತ್ತೆರಡನೆಯ ಪಾಠ
स्नेह-संयुक्तम्	ಪ್ರೀತಿಯಿಂದ ಕೂಡಿದ
मधुरम्	ಇಂಪಾದ

वृत्तान्तः ಸುದ್ದಿಯು
समीपम् ಹತ್ತಿರ
प्रेषिताः ಕಳುಹಿಸಲ್ಪಟ್ಟರು
विदिता ಗೊತ್ತಿದ್ದದು
अवृण्वन् ಬೇಡಿದರು
विमुखीभूताः ಹಿಂದಿರುಗಿದವರು
सपरिवारः ಪರಿವಾರ ಸಹಿತನು
परम-हर्षितः ಬಹಳ ಸಂತುಷ್ಟನು
निवेदनार्थम् ತಿಳಿಸುವದಕ್ಕೆ

೩೩

त्रयस्त्रिंशः पाठः ಮೂವತ್ತಮೂರನೆಯ ಪಾಠ
भवद्भिः ತಮ್ಮಿಂದ
संबन्धः ಸಂಬಂಧವು
अयम् वः रोचते ಇದು ನಿಮಗೆ ಸೇರುತ್ತದೆ
श्वः ನಾಳೆ
व्यतीता ಕಳೆದುಹೋದ
पुष्कलम् ಬಹಳ
धनाध्यक्षाः ಕೋಶಾಧ್ಯಕ್ಷರು
द्विजाः ದ್ವಿಜರು
चतुरङ्गम् ಚತುರಂಗವು
संभाराः ಜೋಡಣೆ
क्रियन्ताम् ಮಾಡಲ್ಪಡಲಿ
सुखेन ಸುಖದಿಂದ
प्रहृष्टः ಆನಂದ ಹೊಂದಿದವನು

೩೪

चतुस्त्रिंशः पाठः ಮೂವತ್ತನಾಲ್ಕನೆಯ ಪಾಠ
स्वागतम् ते ನಿನಗೆ ಸ್ವಾಗತವು
दिष्ट्या ಸಂತೋಷವಾಯಿತು
युष्माभिः सह ನಿಮ್ಮ ಸಂಗಡ
संभावितम् ಸನ್ಮಾನಹೊಂದಿದ
परस्परः ಪರಸ್ಪರ
समागमः ಸಹವಾಸ
अन्येद्युः ಮಾರನೆಯ ದಿನ
बान्धवः ಆಪ್ತನು
मन्त्री ಮಂತ್ರಿಯು
प्रतिग्रहे ತೆಗೆದುಕೊಳ್ಳುವಾಗ
प्रदाने ಕೊಡುವಾಗ
कुलम् वक्तव्यम् ಕುಲವನ್ನು ಹೇಳಬೇಕು
संप्रदायः ಸಂಪ್ರದಾಯವು
परिकीर्तितम् ಹೇಳಲ್ಪಟ್ಟಿತು
प्रवीणः ಪಂಡಿತನಾದ
उपागतः ಬಂದವನು
स्वयम् एव ಸ್ವತಃ
अनुसृत्य ಅನುಸರಿಸಿ

೩೫

पञ्चत्रिंशः पाठः ಮೂವತ್ತೈದನೆಯ ಪಾಠ
पुत्रयोः अर्थे ಮಕ್ಕಳಿಗಾಗಿ
वरये ಬೇಡುತ್ತೇನೆ
सहर्षम् ಆನಂದದಿಂದ
वधूः ಕನ್ಯೆಯು
ददामि ಕೊಡುತ್ತೇನೆ
अनुपमम् ಸಾಮ್ಯವಿಲ್ಲದ
कुलद्वयम् ಎರಡು ಕುಲಗಳು
अत्रभवतोः ಪೂಜ್ಯರಾದ ನಿಮ್ಮ
रूपम् ರೂಪವು

वाञ्छितम्	ಇಷ್ಟವು
यवीयान् भ्राता	ತಮ್ಮನು
दातुम् अर्हसि	ಕೊಡಬೇಕು
निज-कुलम्	ಸ್ವಂತ ಕುಲವು
ईप्सितम्	ಇಷ್ಟವು
अनायासेन	ಶ್ರಮವಿಲ್ಲದೇ
भार्ये भजेताम्	ಮದುವೆಯನ್ನು ಮಾಡಿಕೊಳ್ಳಲಿ
निर्वृत्तः	ಆದ
वाङ्निश्चयः	ವಾಙ್ನಿಶ್ಚಯವು
आलयः	ಮನೆಯು
आपृच्छ्य	ನಿರೋಪ ತೆಗೆದು ಕೊಂಡು
विवाह-पूर्वगाः	ವಿವಾಹದ ಮೊದಲಿನ
संस्काराः	ಸಂಸ್ಕಾರಗಳು
वराः	ವರರು
त्रिः	ಮೂರುಸರ್ತಿ

೩೬

षट्त्रिंशः पाठः	ಮೂವತ್ತಾರನೆಯ ಪಾಠ
अपरेद्युः	ಮರುದಿವಸ, ಮರುದಿನ
शुभे मुहूर्ते	ನೇಮಿಸಿದ ಶುಭಕಾಲದಲ್ಲಿ
आभरणानि	ಆಭರಣಗಳು
भूषिताः	ಶೋಭಿತರು
पितुः समीपम्	ತಂದೆಯ ಹತ್ತರ
प्रत्यैक्षत	ಎದಿರು ನೋಡಿದನು ಹಾದಿ ನೋಡಿದನು
अलंकृता	ಶೋಭಿತಳು
वेदीं परितः	ವೇದಿಯ ಸುತ್ತಲು
पात्राणि	ಪಾತ್ರೆಗಳು
अजुहोत्	ಹೋಮ ಮಾಡಿದನು
समानीय	ಕರತಂದು
अभिमुखम् संस्थाप्य	ಎದಿರಾಗಿ ನಿಲ್ಲಿಸಿ
अग्नेः समक्षम्	ಅಗ್ನಿಯ ಸಮಕ್ಷ
सहधर्मचारिणी	ಧರ್ಮಪತ್ನಿಯು
प्रतीच्छ	ಸ್ವೀಕಾರಮಾಡು
पाणिः	ಕೈ
छाया	ನೆರಳು, ಛಾಯೆಯು
पतिव्रता	ಪತಿವ್ರತೆಯು
प्रदक्षिणीकृत्य	ಪ್ರದಕ್ಷಿಣೆಮಾಡಿ, (ಹಾಕಿ)
उदकम्	ನೀರು
अपातयत्	ಚಲ್ಲಿದ, ಹಾಕಿದ
सर्वे भवन्तः	ನೀವೆಲ್ಲರು
सौम्याः	ಸೌಮ್ಯರು
सुचरितव्रताः	ಒಳ್ಳೆಯ ನಿಯಮವುಳ್ಳವರು ಸದಾಚರಣೆಯುಳ್ಳವರು

೩೭

सप्तत्रिंशः पाठः	ಮೂವತ್ತೇಳನೆಯ ಪಾಠ
परिवारः	ಪರಿವಾರವು
ससंभ्रमः	ಗಡಬಡಿಸಿಹೋದ
संभ्रमः	ಗಡಬಡೆಯು
अनेकशः	ಅನೇಕಸಾರೆ, ಬಹಳಸರ್ತಿ

न खलु	ಇಲ್ಲವೇ ?
मिथः अजल्पन्	ಪರಸ್ಪರವಾಗಿ (ತಮ್ಮೊಳಗೆ) ಗುಜುಗುಜು ಮಾತನಾಡಿ ಕೊಂಡರು
प्रमुखः	ಪ್ರಮುಖನು
जामदग्न्यः	ಜಮದಗ್ನಿಯ ಮಗನಾದ
दाशरथिः	ದಶರಥನ ಮಗನಾದ
भेदनम्	ಮುರಿಯೋಣವು
वैष्णवम्	ವಿಷ್ಣುವಿನ
शक्नोषि	ಶಕ್ತನಿರುತ್ತಿ, ಸಮರ್ಥನಾಗಿರುವೆ
द्वन्द्वम्	ಕೈಕಾಳಗ, ಕುಸ್ತಿಯು

೩೮

अष्टात्रिंशः पाठः	ಮೂವತ್ತೆಂಟನೆಯ ಪಾಠ
विषण्णम्	ಬಾಡಿದ, ಉದಾಸೀನ
वदनम्	ಮುಖವು
दीनः	ದೀನನು
अभयम् प्रयच्छ	ಅಭಯವನ್ನು ಕೊಡು
सर्व-विनाशः	ಎಲ್ಲರ ನಾಶವು
अवजानासि	ಅಪಮಾನ ಮಾಡುತ್ತಿ
पराक्रमः	ಪರಾಕ್ರಮವು
मोघः	ವ್ಯರ್ಥವು
प्राणहरः	ಪ್ರಾಣ ತಕ್ಕೊಳ್ಳುವಂಥ
मोक्तुम्	(ಬಾಣ) ಬಿಡಲಿಕ್ಕೆ
हन्तव्यः	ಕೊಲ್ಲಲಿಕ್ಕೆ ಯೋಗ್ಯ
गर्व-परिहारात्	ಗರ್ವವನ್ನು ಕಳೆದುದರಿಂದ
जडीकृतः	(ಕಲ್ಲಿನಂತೆ) ತಟಸ್ಥನಾಗಿ
राज-प्रवेशः	ರಾಜನ ಪ್ರವೇಶವು
सिक्तः	ನೆನಸಲ್ಪಟ್ಟ, ಸಿಂಪಡಿಸಿದ
मङ्गल-वादनम्	ಮಂಗಲ ವಾದ್ಯವು
ध्वजाः	ಧ್ವಜಗಳು
जनौघः	ಜನಸಮೂಹವು
पौराः	ಪುರಜನರು, ನಾಗರಿಕರು
उत्सवः	ಉತ್ಸವವು
प्रसीद	ಪ್ರಸನ್ನನಾಗು
निनादिता	ಶಬ್ದಗೊಳಿಸಲ್ಪಟ್ಟ, ದುಮದುಮಿಸಿದ
समलंकृता	ಶೋಭಿತವಾದ
प्रकीर्णः	ಹರವಲ್ಪಟ್ಟ ಪಸರಿಸಿದ
कुसुमोत्करः	ಹೂವಿನರಾಶಿಯು

३९

एकोनचत्वारिंशः पाठः	ಮೂವ್ವತ್ತೊಂಬತ್ತನೆಯ ಪಾಠ
प्रष्टव्यम्	ಬೆಸಗೊಳ್ಳತಕ್ಕುದು, ಕೇಳತಕ್ಕದ್ದು
छात्रः	ಶಿಷ್ಯನು
चित्राः कथाः	ವಿಚಿತ್ರ (ಸೋಜಿಗ) ಕಥೆಗಳು
अथ किम्	ಹೌದು !
अवसरः	ಸ್ಥಳವು, ಇಂಬು
व्याकरणम्	ವ್ಯಾಕರಣ
अधीष्व	ಅಧ್ಯಯನ ಮಾಡು
सम्यक्	ಚೆಲೋರೀತಿಯಿಂದ
सुपरिचितः	ಪರಿಚಯದ
गीर्वाण-वाणी	ಸಂಸ್ಕೃತ ಭಾಷೆಯು
रचना-विशेषः	ಭಾಷಾರೀತಿ
ताः ताः कथाः	ಬೇರೆ ಬೇರೆ ಕಥೆಗಳು
समग्रम्	ಪೂರ್ಣ
नानाविधाः	ತರತರದ
विवाहपर्यन्तम्	ಮದುವೆಯಾಗುವವರೆಗೆ
शुभम्	ಶುಭವು
श्रवणमात्रेण	ಬರೇ ಕೇಳಿದಕೂಡ್ಲೆ
तृप्तिः	ಸಮಾಧಾನ

श्रीमत्सुबोध-संस्कृतम्।
or Easy Steps to Sanskrit (" Independence " Edition 1955)
by B. B. Kamat



चित्रकार महाशयः श्रीयुत पाटकर

ॐ

श्रीगणेशाय नमः ।



(१) प्रथमः पाठः ।

बालकः गणेशम् नमति । बालकस्य नाम अशोकः । तस्य हस्ते पुस्तकम् अस्ति । पुस्तकस्य नाम सुबोध-संस्कृतम् । अशोकः पाठ-शालाम् गच्छति, गुरुम् नमति, पुस्तकम् पठति च । तेन गुरुः संतुष्टः भवति । गुरवे नमः ।

(२) द्वितीयः पाठः ।

श्रीरामाय नमः ।

कः एषः बालकः ? एषः बालकः रामः । रामः कस्य पुत्रः अस्ति ? रामः दशरथस्य पुत्रः । कः एषः दशरथः ? दशरथः अयोध्यायाः राजा अस्ति । दशरथः रामस्य पिता । रामः दशरथम् नमति ।

रामस्य माता का ? रामस्य माता कौसल्या । तस्मात् कौसल्या दशरथस्य भार्या । रामः कौसल्याम् नमति । रामः मातरम् नमति । रामः पितरम् नमति । सः मातापितरौ नमति । मातापितृभ्याम् नमः ।

---

(३) तृतीयः पाठः ।

श्रीलक्ष्मणाय नमः ।

लक्ष्मणः दशरथस्य अपरः पुत्रः अस्ति । लक्ष्मणस्य माता सुमित्रा । सुमित्रा च दशरथस्य अपरा भार्या ।

रामः दशरथस्य पुत्रः । लक्ष्मणः अपि दशरथस्य पुत्रः । तस्मात् रामः लक्ष्मणस्य भ्राता । रामः लक्ष्मणस्य प्रियः । लक्ष्मणः अपि रामस्य प्रियः । रामलक्ष्मणाभ्याम् नमः ।

---

(४) चतुर्थः पाठः ।

पित्रे नमः ।

रामः लक्ष्मणस्य भ्राता अस्ति । रामः लक्ष्मणस्य कीदृशः भ्राता अस्ति ? न सः लक्ष्मणस्य सहोदरः भ्राता । कथम् एतत् ? रामस्य माता कौसल्या । परन्तु लक्ष्मणस्य माता सुमित्रा । तस्मात् रामः लक्ष्मणस्य सापत्नः भ्राता अस्ति, न तु सहोदरः । तथापि रामः लक्ष्मणस्य प्रियः । लक्ष्मणः च रामस्य प्रियः । रामलक्ष्मणौ द्वौ अपि नृपस्य दशरथस्य प्रियौ, अतीव प्रियौ । नृपाय दशरथाय नमः ।

---

(५) पञ्चमः पाठः।

नृपाय नमः।

राजा दशरथः अयोध्यायाम् राज्यम् करोति, प्रजाः रक्षति च। तस्य एका भार्या कौसल्या, अपरा च सुमित्रा नाम। दशरथस्य तृतीया अपि भार्या अस्ति। तस्याः नाम कैकेयी। तस्याः अपि पुत्रः अस्ति भरतः नाम। सुमित्रायाः द्वितीयः अपि पुत्रः अस्ति शत्रुघ्नः नाम। भरतः रामस्य सापत्नः भ्राता। तथा च शत्रुघ्नः अपि। किन्तु शत्रुघ्नः लक्ष्मणस्य सहोदरः। भ्रातृभ्यः नमः।

---

(६) षष्ठः पाठः।

रामः लक्ष्मणः भरतः शत्रुघ्नः च चत्वारः भ्रातरः सन्ति। सर्वे अपि शूराः गुणवन्तः च भवन्ति। तेषाम् रामः सर्वस्य प्रियः। विशेषतः तु रामः लक्ष्मणस्य प्रियः, बाल्यात् प्रभृति अतीव प्रियः। सः अपि लक्ष्मणेन विना अन्नम् न भक्षयति, निद्राम् अपि न लभते। यदा रामः अश्वम् आरोहति, मृगयायै च गच्छति, तदा लक्ष्मणः अपि चापम् गृहीत्वा तम् अनुगच्छति। भरतः शत्रुघ्नस्य प्रियः। शत्रुघ्नः अपि भरतस्य बाल्यात् प्रभृति अतीव प्रियः अस्ति। तैः चतुर्भिः पुत्रैः राजा दशरथः प्रसन्नः अस्ति।

(७) सप्तमः पाठः ।



चित्रकार :—श्रीयुत पाटकर

एकदा विश्वामित्रः अयोध्याम् अगच्छत् राजभवनम् च गत्वा दशरथस्य किङ्करम् अवदत्–"अहं अस्मि मुनिः विश्वामित्रः नाम। वने वसामि। अद्य वनात् आगतः अस्मि। राजानम् दशरथम् च द्रष्टुम् इच्छामि" इति। किङ्करः राजानम् अगच्छत् अवदत् च–"देव, विश्वामित्रः नाम कश्चित् वनात् आगतः मुनिः द्वारे तिष्ठति, देवम् च द्रष्टुम् इच्छति। श्रुत्वा देवः प्रमाणम्" इति। किङ्करस्य वचनेन नृपः संतुष्टः अभवत्। सिंहासनात् च उत्थाय बहिः आगच्छत्। विश्वामित्रम् च अर्घ्येण अपूजयत्। तेन विश्वामित्रः प्रसन्नः अभवत्, राजभवनम् च अविशत्।

(८) अष्टमः पाठः ।

नृपस्य आदरेण विश्वामित्रः प्रसन्नः अभवत् । तम् च कुशलम् अपृच्छत् । नृपः अवदत्–"महामुने, आगमनस्य किम् कारणम्? तव कामम् कर्तुम् इच्छामि" इति । मुनिः अवदत्–"भोः राजन्, तव वचनेन प्रसन्नः अस्मि । अयम् मम कामः । यत्र अहम् वने वसामि, तत्र द्वौ राक्षसौ अपि वसतः । एकः मारीचः नाम, अन्यः च सुबाहुः । द्वौ अपि मम यज्ञस्य विघ्नकरौ भवतः । तौ रुधिरेण मम वेदीम् सिञ्चतः । तेन मम व्रतभङ्गः भवति" इति । राजा अपृच्छत्—"यदि एवम्, भवान् तौ किम् न दण्डयति ?" इति ।

(९) नवमः पाठः ।

मुनिः प्रत्यभाषत—"अहम् तौ स्वयम् न दण्डयामि यतः मम व्रतम् क्रोधेन नश्यति । तस्मात् रामम् मे प्रयच्छ । सः विघ्नकरान् राक्षसान् दण्डयिष्यति । तेन ख्यातः भविष्यति च । अद्य एव रामेण सह वनम् गमिष्यामि" इति ।

रामः दशरथस्य ज्येष्ठः पुत्रः । तस्मात् विश्वामित्रस्य तत् वचनम् श्रुत्वा दशरथः दुःखितः अभवत् ।

ऋषिम् अवदत् च—" रामः अद्यापि बालकः एव। एकाकी राक्षसैः सह युद्धम् कर्तुम् न शक्तः। सैन्यम् गृहीत्वा अहम् अपि रामेण सह वनम् गमिष्यामि। राक्षसैः सह युद्धम् च करिष्यामि। तस्मात् सर्वम् मे कथय—के ते राक्षसाः? कीदृशम् तेषाम् बलम्? के तान् रक्षन्ति?" इति।

(१०) दशमः पाठः।

दशरथस्य तत् वचनम् श्रुत्वा विश्वामित्रः अभाषत—" अस्ति दक्षिणस्याम् दिशायाम् लङ्का नाम नगरी। तत्र रावणः नाम राक्षसः वसति। अन्ये राक्षसाः रावणस्य सहायाः। रावणाय विधिना वरः दत्तः। तेन मत्तः सः सज्जनान् पीडयति। यज्ञस्य विघ्नकरः भवति च। यदा रावणः स्वयम् यज्ञस्य विघ्नकरः न भवति, तदा सः मारीचम् सुबाहुम् च प्रवर्तयति। तस्मात् तौ मम यज्ञस्य विघ्नकरौ भवतः। अन्ये अपि राक्षसाः मम यज्ञस्य विघ्नकराः भवन्ति" इति।

(११) एकादशः पाठः।

राजा वदति—" महर्षे, मम चत्वारः पुत्राः रामलक्ष्मणभरतशत्रुघ्नाः। चतुर्णाम् पुत्राणाम् रामः ज्येष्ठः। सर्वेषाम् रामः मम अतीव प्रियः। रामः अद्यापि

बालकः एव । कथम् सः एकाकी राक्षसैः सह युद्धम् करिष्यति ? बालम् रामम् ते न दास्यामि " इति ।

शीघ्र-कोपः विश्वामित्रः दशरथाय क्रुध्यति । तस्य नेत्रे आरक्ते भवतः । सः राजानम् वदति– " राजन् दशरथ, पूर्वम् त्वम् अवदः–' तव कामम् कर्तुम् इच्छामि ' इति । इदानीम् च वदसि–' न तव कामम् करिष्यामि ' इति । एतत् तव न उचितम् । अहम् यथागतम् गमिष्यामि । तव प्रतिज्ञा मिथ्या । मिथ्या-प्रतिज्ञः त्वम् कथम् सुखी भविष्यसि ? " इति उक्त्वा सः क्रुद्धः मुनिः गन्तुम् इच्छति ।

---

(१२) द्वादशः पाठः ।

अस्ति दशरथस्य कुलगुरुः वसिष्ठः नाम । क्रुद्धम् विश्वामित्रम् दृष्ट्वा, सः राजानम् वदति–" राजन् दशरथ, न एतत् तव उचितम् । तव प्रतिज्ञा मिथ्या मा भवतु । सत्य-प्रतिज्ञः भव । त्वम् क्षत्रियः असि । स्वधर्मम् मा त्यज । यज्ञस्य रक्षणम् कुरु । मुनये विश्वामित्राय रामम् प्रयच्छ । विश्वामित्रेण रक्षितम् रामम् पीडयितुम् राक्षसाः न समर्थाः । एषः मुनिः विविधानि अस्त्राणि जानाति । सर्वम् अपि रामस्य हिताय भविष्यति । तस्य भयम् न विद्यते । संशयम् त्यज । प्रतिज्ञा-भङ्गम् मा कुरु " इति ।

---

(१३) त्रयोदशः पाठः ।

वसिष्ठस्य तत् वचनम् श्रुत्वा, नृपः विश्वामित्रम् वदति—"भगवन्, माम् क्षमस्व। रामम् ते दास्यामि" इति। अनेन दशरथस्य वचनेन वसिष्ठ-विश्वामित्रौ प्रसन्नौ भवतः। राजा दशरथः रामम् आह्वयति। रामः शीघ्रम् आगच्छति। रामेण सह लक्ष्मणः अपि आगच्छति। अग्रतः रामः आगतः, तस्य पृष्ठतः च लक्ष्मणः। नृपः प्रियम् पुत्रम् रामम् तथा एव लक्ष्मणम् च विश्वामित्राय प्रयच्छति। तेन विश्वामित्रः संतुष्टः भवति। रामलक्ष्मणौ विश्वामित्रम् नमतः। सः अपि हस्तौ उद्यम्य, ताभ्याम् आशीर्वचनम् यच्छति, यथा चित्रे दृश्यते।

---

(१४) चतुर्दशः पाठः ।

एषः श्यामलः बालकः रामः। अयम् च गौरः बालकः लक्ष्मणः। रामलक्ष्मणौ विश्वामित्रस्य अग्रतः तिष्ठतः। द्वौ अपि अञ्जलिम् बद्ध्वा विश्वामित्रम् नमतः। रामलक्ष्मणयोः दक्षिणतः गुरुः वसिष्ठः तिष्ठति, तयोः पृष्ठतः च राजा दशरथः। वसिष्ठदशरथयोः पृष्ठतः च सिंहासनम् वर्तते। सिंहासनस्य उपरि छत्रम् च भवति। तस्य वामतः एकः किङ्करः तिष्ठति।

श्रीमत्सुबोध-संस्कृतम् ।

or Easy Steps to Sanskrit (" Independence " Edition 1955)

by B. B. Kamat



चित्रकार-महाशयाः—श्रीमंत बाळासाहेब पंत प्रतिनिधि (माजी) राजासाहेब (औंध)

तस्य हस्ते चामरम् अस्ति । सिंहासनस्य दक्षिणतः अन्यस्य किङ्करस्य हस्तः एव दृश्यते । तस्मिन् हस्ते अपि अन्यत् चामरम् भवति । छत्रम् च द्वे चामरे च राज-चिह्नानि । विश्वामित्रस्य पार्श्वतः अपि तृतीयः किङ्करः भवति । सर्वे प्रसन्नाः दृश्यन्ते ।

---

(१५) पञ्चदशः पाठः ।

रामस्य शीर्षे मुकुटम्, कण्ठे हारः, पृष्ठे च तूणीरः । तूणीरे च बाणाः दृश्यन्ते । लक्ष्मणस्य अपि शीर्षे कण्ठे पृष्ठे च मुकुट–हार–तूणीराः दृश्यन्ते । तथा च दशरथस्य अपि । रामलक्ष्मणौ बालकौ एव दृश्येते । दशरथः तु बलवान् दृश्यते । विश्वामित्रस्य मस्तके जटाः वर्तन्ते, तथा च वसिष्ठस्य अपि । तयोः मुखयोः प्रभूताः केशाः वर्तन्ते । वसिष्ठस्य कूर्चः दीर्घः धवलः च । विश्वामित्रस्य अपि कूर्चः दीर्घः अस्ति । न तु तादृशः धवलः यादृशः वसिष्ठस्य । एकः पृष्ठे अजिनम् धारयति, अन्यः तु क्षौमम् । यः किङ्करः विश्वामित्रस्य पार्श्वे तिष्ठति, तस्य हस्ते दण्डः वर्तते । सः पृष्ठे कार्पासम् वस्त्रम् धारयति । तस्य शिरोवस्त्रम् अपि कार्पासम् अस्ति । तस्य कूर्चः ह्रस्वः कृष्णः च ।

---

(१६) षोडशः पाठः ।

दशरथेन रामः विश्वामित्राय दत्तः । तेन सह विश्वामित्रः वनाय प्रस्थितः । मुनिः अग्रतः याति, तस्य पृष्ठतः च रामः चापम् गृहीत्वा गच्छति । तस्य पृष्ठे तूणीरः वर्तते । रामः वनम् गच्छति । तदा लक्ष्मणः अपि तम् अनुगच्छति । तस्य अपि हस्ते धनुः वर्तते, पृष्ठे च तूणीरः । तूणीरे च बाणाः वर्तन्ते । क्रोशद्वयम् गत्वा ते सरयूम् नदीम् पश्यन्ति । नद्याम् प्रभूतम् निर्मलम् जलम् वर्तते । विश्वामित्रः रामम् अभिभाषते—"वत्स राम, इयम् नदी सरयूः नाम । अस्याः नद्याः शोभाम् पश्य" इति ।

---

(१७) सप्तदशः पाठः ।

ऋषिः भाषते—"अस्याम् नद्याम् प्रभूतम् जलम् वर्तते । जलम् च स्वच्छम् अस्ति । वत्स राम, जलम् हस्ते गृहाण । अहम् ते अस्त्र-विद्याम् दास्यामि । इमाम् विद्याम् शिक्षस्व । अनया विद्यया त्वम् सर्वान् शत्रून् विजेष्यसे । न च ते क्षुधा पिपासा वा भविष्यति । शीघ्रम् जलम् स्पृश । कालक्षेपम् मा कुरु" इति ।

रामः प्रसन्नः भवति, नद्याः जलम् हस्तेन स्पृशति, ऋषिणा दत्ताम् विद्याम् शिक्षते च । तेन ऋषिः अपि प्रसन्नः भवति ।

भगवान् सूर्यः पश्चिमायाम् दिशायाम् अस्तम् गच्छति । अयम् संध्याकालः प्राप्तः । संध्यावन्दनार्थम् ऋषयः नद्याम् स्नानम् कुर्वन्ति। त्रयः अपि विश्वामित्रः रामः लक्ष्मणः च ताम् रात्रिम् नद्याः तीरे नयन्ति ।

(१८) अष्टादशः पाठः ।

"वत्स राम, शयनम् त्यक्त्वा उत्तिष्ठ । प्राप्तः अयम् प्रभातकालः । नक्षत्राणि आकाशे न दृश्यन्ते । अयम् भगवान् सूर्यः पूर्वस्याम् दिशायाम् उदयति । शीघ्रम् उत्थाय भगवन्तम् भास्करम् पश्य, तम् नम, दिनकृत्यानि च आरभस्व । वत्स लक्ष्मण, त्वम् अपि तत् एव कुरु" ।

विश्वामित्रस्य तत् वचनम् श्रुत्वा, रामः शयनात् उत्तिष्ठति, स्नानम् च करोति । तथा च लक्ष्मणः अपि । तदनन्तरम् प्रभात-करणीयानि कृत्वा, विश्वामित्रम् च नमस्कृत्य, तेन सह वनम् गन्तुम् द्वौ अपि उद्यतौ । वनम् गच्छन्तः ते मार्गे गङ्गायाः सरय्वाः च सङ्गमम् पश्यन्ति ।

---

(१९) एकोनविंशः पाठः ।

मुनिः अभाषत—“वत्सौ, पश्यतम् इदम् गङ्गायाः दक्षिणे तीरे ताटकायाः दारुणम् वनम्” इति । रामः अपृच्छत्—“का इयम् ताटका ?” इति । मुनिः प्रत्यभाषत—“इयम् ताटका सुन्दस्य राक्षसस्य भार्या । पुरा एषः जनपदः धन-धान्य-संपन्नः आसीत् । अथ गच्छता कालेन, इयम् राक्षसी अत्र आगता । तस्याः पुत्रः मारीचः नाम नित्यम् प्रजाः त्रासयते । सा च तस्य दुष्टा माता ताटका इमम् जनपदम् विनाशयति । सा मार्गम् आवृत्य अत्र वसति । ईदृशम् उत्सादितम् देशम् आगन्तुम् कः अपि न शक्तः । तस्मात् मारय एनाम् दुष्टाम् । इमम् देशम् च पूर्ववत् निष्कण्टकम् कुरु” इति ।

(२०) विंशः पाठः ।

रामः वदति—“भगवन्, इयम् ताटका राक्षसी अपि नारी अस्ति । कथम् नु अहम् नारीम् मारयेयम् !” इति । मुनिः प्रतिभाषते—“मा मैवम् । एषा नारी अपि दुष्टा परमदारुणा च । त्वाम् ऋते न कश्चित् एनाम् दण्डयितुम् शक्तः । ‘नारीवधः अयम्’ इति शङ्का न कार्या । न वा इयम् दयाम् अर्हति । धर्मः एव क्षत्रियस्य दुष्टानाम् दण्डनम् ।

श्रीमत्सुबोध-संस्कृतम् ।
or Easy Steps to Sanskrit (" Independence " Edition 1955)
by B. B. Kamat



चित्रकार-महाशयाः—श्रीमंत बाळासाहेब पंत प्रतिनिधि (माजी) राजासाहेब (औंध)

ताटका च अतीव दुष्टा। निःशङ्कम् ताम् मारय। पुरा अपि बहुभिः राजपुत्रैः धर्मरहिताः दुष्टाः नार्यः हताः" इति। रामः वदति—"भगवन्, भवतः वचनम् प्रमाणम्। ताटकाम् हनिष्यामि" इति।

(२१) एकविंशः पाठः।

इदम् आलेख्यम् ताटकायाः वनस्य। अस्मिन् बहवः वृक्षाः सन्ति। वृक्षाणाम् स्कन्धेषु शाखाः वर्तन्ते, शाखासु च पर्णानि। वृक्षान् गणयामि। अत्र द्वादश वृक्षाः दृश्यन्ते। दक्षिणतः एकः। वामतः च एकः, द्वौ, त्रयः, चत्वारः, पञ्च, षट्, सप्त, अष्टौ, नव, दश, एकादश वृक्षाः सन्ति। दूरे ताटका दृश्यते। तस्याः दक्षिणे हस्ते खड्गः, वामे हस्ते च फलकः। वामतः यः प्रथमः वृक्षः भवति, तस्य अधस्तात् मुनिः विश्वामित्रः तिष्ठति। तत्र च द्वौ चापधरौ कुमारौ अपि तिष्ठतः। तौ राजपुत्रौ रामलक्ष्मणौ, श्यामलः रामः, गौरः च लक्ष्मणः। तयोः चापयोः मौर्व्यौ अपि दृश्येते। रामः मौर्व्याम् बाणम् आरोप्य, सन्धानम् च कृत्वा, ताटकाम् मारयति इव। लक्ष्मणः तु केवलम् मौर्व्याम् बाणम् आरोप्य सज्जः तिष्ठति।

---

(२२) द्वाविंशः पाठः ।

रामः बाणेन ताटकाम् अमारयत् । मृतायाम् च तस्याम्, इदम् वनम् अधुना निष्कण्टकम् भवति । अद्यप्रभृति जनपदः सुखी भविष्यति, यतः ताटका तम् न विनाशयिष्यति । ताटकायाः वधेन विश्वामित्रः प्रसन्नः भवति । सः रामाय बहूनि अस्त्राणि प्रयच्छति । तानि अस्त्राणि प्रतिगृह्य रामः वदति-" भगवन्, आश्रमम् ते शीघ्रम् गच्छाम । कुत्र ते दुष्टाः राक्षसाः ये तव यज्ञस्य विघ्नकराः भवन्ति ? अहम् तत्र गत्वा यज्ञम् रक्षिष्यामि " इति । ततः ते त्रयः अपि सिद्धाश्रमम् नाम विश्वामित्रस्य आश्रमम् गच्छन्ति । तेन आश्रमवासिनः मुनयः संतुष्टाः भवन्ति ।

---

(२३) त्रयोविंशः पाठः ।

आश्रमवासिनः अर्घ्येण विश्वामित्रम् अपूजयन्, राजपुत्रयोः अतिथि-क्रियाम् च अकुर्वन् । राजपुत्रौ विश्वामित्रम् अवदताम्—" अद्य एव भवान् दीक्षाम् गृह्णातु । विघ्नकराः च ते राक्षसाः कदा निवारणीयाः तत् नौ कथयतु " इति । मुनिः प्रत्यभाषत—" अद्य दीक्षाम् गमिष्यामि । अद्यप्रभृति षट् दिनानि युवाम्

श्रीमत्सुबोध-संस्कृतम् ।

or Easy Steps to Sanskrit (" Independence " Edition 1955)

by B. B. Kamat



चित्रकार-महाशयाः—श्रीमंत बाळासाहेब पंत प्रतिनिधि (माजी) राजासाहेब (औंध)

तपोवनम् रक्षतम् । अहम् तु मौनम् धारयिष्यामि” इति । मुनेः तत् वचनम् श्रुत्वा, रामलक्ष्मणौ अनिद्रौ पञ्च दिनानि तपोवनम् अरक्षताम् । अथ षष्ठे दिने प्राप्ते, रामः लक्ष्मणम् अवदत्—“ तात लक्ष्मण, समाहितः भव” इति । पुरोहितः वेद्याम् अग्निम् अज्वलयत् । यथान्यायम् च यज्ञः संप्रवर्तितः अभवत् । तस्मिन् एव क्षणे कश्चित् भयानकः महान् शब्दः आकाशे प्रादुरासीत् ।

---

(२४) चतुर्विंशः पाठः ।

अयम् परिसरः आश्रमपदस्य । अत्र अष्टौ कुटीराः दृश्यन्ते । तथा च त्रयः देवालयाः अपि । त्रयाणाम् देवालयानाम् त्रीणि शिखराणि दृश्यन्ते । आकाशे मारीचः सुबाहुः च दृश्येते । तयोः अनुचराः तु आलेख्ये न दृश्यन्ते । तेषाम् भयानकात् शब्दात् त्रस्ताः पक्षिणः आकाशे उड्डयन्ते । एते आश्रमवासिनः किमर्थम् कुटीरेभ्यः बहिः आगताः ? राक्षसानाम् भयानकः शब्दः एव तेषाम् निर्गमनस्य कारणम् । यदा राक्षसाः आश्रमपदम् त्रासयन्ते, तदा आश्रमवासिनः भीताः भवन्ति । इदानीम् तु राक्षसेभ्यः आश्रमवासिनाम् भयम् न विद्यते, यतः राक्षसैः सह योद्धुम् रामः सज्जः तिष्ठति । वामेन हस्तेन चापम्

गृहीत्वा, दक्षिणेन हस्तेन ज्यायाम् बाणम् आरोप्य, ताम् च आकर्णम् आकृष्य, सः मारीचस्य शरीरे बाणम् क्षिपति। लक्ष्मणः अपि राक्षसेषु बहून् बाणान् अस्यति।

---

(२५) पञ्चविंशः पाठः।

बाणेन विद्धः मारीचः भूमौ अपतत्। तदा रामः लक्ष्मणम् अवदत्—"पश्य, लक्ष्मण, इमान् अन्यान् अपि यज्ञस्य विघ्नकरान् हनिष्यामि" इति। हतेषु विघ्नकरेषु राक्षसेषु, ऋषयः रामम् अपूजयन्। अथ समाप्ते यज्ञे, महामुनिः विश्वामित्रः तम् अब्रवीत्—"कृतम् त्वया गुरुवचनम्। कृतार्थः अस्मि अद्य" इति। ताम् रात्रिम् भ्रातरौ राजपुत्रौ आश्रमे एव अवसताम्।

प्रभातायाम् रात्र्याम्, प्रभात-करणीयानि कृत्वा, विश्वामित्रम् च नमस्कृत्य, तौ अवदताम्—"भगवन्, आवाम् ते किङ्करौ समुपस्थितौ। यथेष्टम् नौ आज्ञापय। तव शासनम् करिष्यावः" इति। विश्वामित्रः प्रत्यभाषत—"वत्स राम, निःशेषम् हताः यज्ञस्य विघ्नकराः त्वया। अद्य वयम् मिथिलाम् गमिष्यामः। तत्र जनकस्य यज्ञः भविष्यति। अन्यत् अपि अद्भुतम् मिथिलायाम् द्रष्टव्यम्। अनुसरतम् यदि अस्माभिः सह गमने मतिः भवेत्" इति।

(२६) षड्विंशः पाठः।

रामः अपृच्छत्—"भगवन्, किम् नु तत् अद्भुतम् यत् मिथिलायाम् द्रष्टव्यम्? तत् नौ कथय। महत् हि आवयोः कौतूहलम्" इति। मुनिः प्रत्यभाषत—"वत्स राम, शृणु। अस्ति खलु राज्ञः जनकस्य अद्भुतम् धनुः। पुरा तत् शिवेन जनकस्य पूर्वजाय दत्तम्। तत् च तत्र विदेहानाम् कुले न्यासः इव तिष्ठति। तस्य बलम् अप्रमेयम्। तस्य आरोपणम् कर्तुम् पुरा के अपि न शक्ताः। तस्य धनुषः बलम् ज्ञातुकामाः कतिपयाः महाबलाः राजपुत्राः मिथिलाम् आगताः। तत् आरोपयितुम् तु असमर्थाः। अन्यत् च। राज्ञः जनकस्य एका कन्या भवति सीता नाम। ताम् बहवः नृपाः वृण्वन्ति। यः कः अपि वीरः शिवधनुः आरोप्य स्वबलम् दर्शयिष्यति, तस्मै एव जनकः कन्याम् सीताम् दास्यति न अन्यस्मै" इति उक्त्वा मुनिश्रेष्ठः मिथिलाम् उद्दिश्य प्रस्थानम् अकरोत्। सलक्ष्मणः रामः अपि तम् अन्वगच्छत्।

---

(२७) सप्तविंशः पाठः।

अथ ते सर्वे अपि मिथिलाम् प्राप्ताः यज्ञवाटम् च उपागताः। रामः अब्रवीत्—"अयम् यज्ञवाटः। अत्र

नानादेश-निवासिनः वेदाध्ययन-शालिनः ब्राह्मणाः आगताः दृश्यन्ते । अहो शोभना यज्ञ-समृद्धिः महात्मनः जनकस्य ! वयम् कुत्र वत्स्यामः ? " इति । रामस्य तत् वचनम् श्रुत्वा, विश्वामित्रः विविक्ते सलिलायुते देशे निवेशम् अकरोत् ।

विश्वामित्रम् अनुप्राप्तम् श्रुत्वा राजा जनकः त्वरितम् तस्य समीपम् अगच्छत्, तम् च अपूजयत्। मुनिः अपि जनकस्य पूजाम् स्वीकृत्य, तस्य कुशलम् यज्ञस्य च निर्विघ्नताम् अपृच्छत् । राजा अवदत्—"भगवन्, एते मुनयः भवान् च आसनानि अलंकुर्वन्तु । धन्यः अस्मि, अनुगृहीतः अस्मि, यत् एभिः मुनिभिः सह मम यज्ञोपसदनम् प्राप्तः असि" इति ।


(२८) अष्टाविंशः पाठः ।

जनकः बद्धाञ्जलिः अवदत्—"भगवन्, कौ इमौ कुमारौ वीरौ धनुर्धरौ ? कस्य पुत्रौ ? तत् श्रोतुम् इच्छामि" इति । जनकस्य तत् वचनम् श्रुत्वा, विश्वामित्रः अवदत्—"राजन्, इमौ क्षत्रियौ अयोध्यानाथस्य दशरथस्य पुत्रौ रामलक्ष्मणौ लोकविश्रुतौ । यत् शैवम् धनुः तव कोशागारे तिष्ठति, तत् द्रष्टुकामौ । तत् आभ्याम् दर्शय । तस्य धनुःश्रेष्ठस्य

दर्शनात् कृतकामौ यथेष्टम् गमिष्यतः" इति। मुनेः तत् वचनम् श्रुत्वा जनकः प्रत्यभाषत—"बाढम्। धनुः आभ्याम् दर्शयिष्यामि। अन्यत् च निवेदनीयम्। अस्ति मम कन्या सीता नाम। 'यः कः अपि वीरः अस्य धनुषः आरोपणम् करिष्यति, तस्मै एव सुताम् सीताम् दास्यामि, न अन्यस्मै' इति मे प्रतिज्ञा। वयम् प्रासादम् गच्छाम धनुः च पश्याम" इति।

---

(२९) एकोनत्रिंशः पाठः।



जनकेन आदिष्टाः सचिवाः कोशागारम् अगच्छन्। कोशागारस्य द्वारम् सदा अर्गलेन पिहितम्

अभवत्, यतः बहुमूल्यानि वस्तूनि तत्र रक्षणार्थम् निहितानि आसन्। शिवस्य धनुः अपि तत्र एव निहितम् आसीत्। द्वारम् निरर्गलीकृत्य, बहूनाम् नराणाम् साहाय्येन एकस्याम् अष्टचक्रायाम् लोह-घटितायाम् मञ्जूषायाम् धनुः निधाय, बहवः नराः मञ्जूषाम् रज्ज्वा कथंचन समवहन्, यथा आलेख्ये दृश्यते। ताम् च पुरतः कृत्वा, सचिवाः प्रासादस्य प्राङ्गणम् अगच्छन्। आनीतम् धनुः दृष्ट्वा विश्वामित्रः अवदत्—"वत्स राम, पश्य इदम् धनुः" इति। रामः अपि यत्र सा मञ्जूषा स्थिता तत्र गत्वा, धनुः च दृष्ट्वा अब्रवीत्—"अस्य धनुषः तोलने पूरणे अपि च यतिष्ये" इति। "बाढम्, यतस्व" इति राजा जनकः प्रत्यभाषत।

---

(३०) त्रिंशः पाठः।

अहो माधुर्यम् अस्य दृश्यस्य! इदम् प्राङ्गणम् जनकस्य प्रासादस्य। तस्य परस्तात् रम्यम् उपवनम् दृश्यते। प्राङ्गणे च मन्दिरम् भवति। मन्दिरस्य स्तम्भाः सोपानम् च, तथा एव प्राङ्गणस्य भूमिः अपि, सर्वाणि धवलानि स्फटिकमयानि दृश्यन्ते। मन्दिरप्रवेशे सिंहासनम्, तस्य उपरि छत्रम् च भवति। सिंहासनस्य अग्रतः वृद्धः राजा जनकः विस्मितः इव तिष्ठति।

श्रीमत्सुबोध-संस्कृतम् ।
or Easy Steps to Sanskrit (" Independence " Edition 1955)
by B. B. Kamat



चित्रकार-महाशयाः—श्रीमंत बाळासाहेब पंत प्रतिनिधि (माजी) राजासाहेब (औंध)

तस्य दक्षिणतः च तस्य कन्या सीता। सा अपि विस्मिता, किञ्चित् हर्षिता अपि च दृश्यते। प्राङ्गणे च कतिपयाः जटा-धराः मुनयः, मुकुट-धराः राज-पुत्राः, अन्ये च नानाविध–शिरो–वस्त्र–धराः नराः तिष्ठन्ति। सर्वे अपि हस्त-प्रक्षेपात् विस्मिताः इव दृश्यन्ते। किम् नु तत् अद्भुतम् येन एते विस्मयन्ते? एषः श्यामलः रम्यमूर्तिः चाप-धरः कुमारः सर्वेषाम् विस्मयस्य कारणम्। शिवधनुः न केवलम् तेन तोलितम्, किंतु लीलया पूरयित्वा, मौर्वीम् च आकर्णम् आकृष्य, तेन तत् मध्ये भग्नम् अपि !!!

---

(३१) एकत्रिंशः पाठः।

"अहो बत महत् चित्रम्! अहो आश्चर्यम्! अहो वीर्यम् अस्य कुमारस्य! इदम् मया न तर्कितम्! 'यः कः अपि वीरः शिवधनुषः आरोपणम् करिष्यति, तस्मै एव सीताम् दास्यामि, न अन्यस्मै' इति मम प्रतिज्ञा अद्य सत्या भविष्यति। रामम् भर्तारम् आसाद्य सीता अस्माकम् कुलस्य कीर्तिम् वर्धयिष्यति। प्राणेभ्यः अपि प्रियाम् मम सुताम् रामाय दास्यामि। अयोध्याम् शीघ्रम् गत्वा दूताः राज्ञे दशरथाय इदम् वृत्तम् कथयन्तु, तम् च मिथिलाम् आनयन्तु" इति।

एवम् उक्त्वा जनकः दूतान् अयोध्याम् अहिनोत् । अयोध्याम् गत्वा, दशरथस्य प्रासादम् च प्राप्य, दूताः सिंहासने स्थितम् वृद्धम् नृपम् अपश्यन्, अञ्जलिम् च बद्ध्वा तम् अवदन्—

---

(३२) द्वात्रिंशः पाठः ।

" महाराज, मिथिलानाथः जनकः स्नेह-संयुक्तेन मधुरेण वचनेन देवस्य कुशलम् पृच्छति । मिथिला-वृत्तान्तस्य निवेदनार्थम् वयम् देवस्य समीपम् प्रेषिताः । बहवः राजानः जनकस्य कन्याम् सीताम् अवृण्वन् । राज्ञः जनकस्य प्रतिज्ञा तु ' यः कः अपि वीरः शिवधनुषः आरोपणम् करिष्यति, तस्मै एव सीताम् दास्यामि, न अन्यस्मै ' इति विदिता एव । धनुषः आरोपणे असमर्थाः ते सर्वे अपि राजानः विमुखीभूताः । रामभद्रेण पुनः न केवलम् तत् धनुः आरोपितम्, किन्तु मौर्वीम् आकर्णम् आकृष्य मध्ये भग्नम् अपि ! तस्मात् महाराजः जनकः सीताम् रामाय, ऊर्मिलाम् च लक्ष्मणाय दातुम् इच्छति । देवम् च सपरिवारम् तत्र आह्वयति । श्रुत्वा देवः प्रमाणम् " इति । दूतानाम् वचनेन राजा परम-हर्षितः अभवत् ।

(३३) त्रयस्त्रिंशः पाठः ।

राजा सचिवान् अब्रवीत्—"श्रुतम् एव भवद्भिः दूतानाम् वचनम् । यदि अयम् संबन्धः वः रोचते, शीघ्रम् मिथिलाम् पुरीम् गच्छाम । काल-क्षेपः मा भवतु" इति । "बाढम्" इति सचिवाः अब्रुवन् । तेन वचनेन प्रहृष्टः राजा अवदत्—"श्वः गमिष्यामः" इति । दूताः च ताम् रात्रिम् सुखेन अयोध्यायाम् अवसन् ।

व्यतीतायाम् रात्र्याम्, राजा सचिवम् एकम् आदिशत्—"अद्य पुष्कलम् धनम् आदाय, धनाध्यक्षाः अग्रे व्रजन्तु । वसिष्ठवामदेवादयः द्विजाः अग्रे गच्छन्तु । चतुरङ्गम् सैन्यम् च शीघ्रम् सज्जम् भवतु । यथा कालक्षेपः न भवेत्, तथा संभाराः क्रियन्ताम्" इति । नृपः रथम् आरुह्य अग्रतः अगच्छत् । चतुरङ्गम् सैन्यम् च तम् अन्वगच्छत् ।

---

(३४) चतुस्त्रिंशः पाठः ।

मिथिलाम् उपागतस्य दशरथस्य समीपम् गत्वा, परम-हर्षितः च भूत्वा, जनकः अवदत्—"महाराज, स्वागतम् ते ! दिष्ट्या प्राप्तः असि । दिष्ट्या सर्वैः द्विज-श्रेष्ठैः सह भगवान् वसिष्ठः प्राप्तः । युष्माभिः

सह संबन्धेन संभावितम् मे कुलम्" इति। परस्पर-समागमेन परमहर्षितानाम् सर्वेषाम् मुनीनाम् सुखेन रात्रिः व्यतीता।

अथ अन्येद्युः समन्त्री सोपाध्यायः सबान्धवः दशरथः जनकस्य प्रासादम् अगच्छत्। 'कन्यायाः प्रतिग्रहे प्रदाने वा कुलम् वक्तव्यम्' इति संप्रदायः। तम् अनुसृत्य इक्ष्वाकूणाम् कुलम् कुलगुरुणा वसिष्ठेन परिकीर्तितम्। विदेहानाम् कुलम् तु सर्ववेदशास्त्रेषु प्रवीणेन जनकेन स्वयम् एव परिकीर्तितम्।

(३५) पञ्चत्रिंशः पाठः।

दशरथः—मम पुत्रयोः रामलक्ष्मणयोः अर्थे तव सुते वरये।

जनकः (सहर्षम्)—वध्वौ ददामि, सीताम् रामाय, द्वितीयाम् ऊर्मिलाम् च लक्ष्मणाय। त्रिः ददामि। अत्र न संशयः।

विश्वामित्रः—अनुपमम् अत्रभवतोः कुलद्वयम्। योग्यः च अयम् धर्म-संबन्धः। रामलक्ष्मणयोः सीतोर्मिलाभ्याम् सह संबन्धः रूपेण अपि योग्यः एव। अन्यत् च चिन्तनीयम्। यत् वसिष्ठस्य मम च वाञ्छि-

तम् तत् श्रूयताम् । तव यवीयसः भ्रातुः राज्ञः कुश-ध्वजस्य सुते, माण्डवीम् श्रुतकीर्तिम् च, भरतशत्रुघ्नाभ्याम् दातुम् अर्हसि ।

जनकः (बद्धाञ्जलिः)–निजकुलम् धन्यम् मन्ये यत् अस्माकम् ईप्सितम् अनायासेन एव लभ्यते । एवम् भवतु । उभौ भरतशत्रुघ्नौ अपि भार्ये भजेताम् । एकस्मिन् एव दिने चत्वारः वराः चतसृणाम् वधूनाम् पाणीन् गृह्णन्तु ।

(एवम् निर्वृत्ते वाङ्निश्चये, जनकम् आपृच्छ्य दशरथः स्वम् आलयम् अगच्छत् । विवाहपूर्वगान् संस्कारान् च अकरोत् ।)

---

(३६) षट्त्रिंशः पाठः ।

अथ अपरेद्युः शुभे मुहूर्ते वसिष्ठादयः ऋषयः वरैः सह यज्ञवाटम् उद्दिश्य प्रस्थिताः । तत्पूर्वम् एव तत्र गत्वा आभरण-भूषिताः रामादयः पितुः जनकस्य समीपम् अतिष्ठन् । वधूभिः सहितः जनकः वेदीसमीपम् स्थित्वा तान् प्रत्यैक्षत । वेदी गन्धपुष्पादिभिः अलंकृता आसीत् । वेदीम् परितः च विविधानि अर्घ्यपात्राणि आसन् । वेद्याम् मन्त्रपूर्वकम् अग्निम् आधाय वसिष्ठः अजुहोत् । ततः सीताम् समानीय, ताम् च रामस्य अभिमुखम्

संस्थाप्य अग्नेः समक्षम् जनकः अवदत्—"इयम् सीता मम सुता तव सहधर्मचारिणी । एनाम् प्रतीच्छ । पाणिना पाणिम् गृहाण । लक्ष्मण, आगच्छ । ऊर्मिलाम् प्रतीच्छ । पाणिना पाणिम् गृहाण । भरत, आगच्छ । माण्डव्याः पाणिम् पाणिना गृहाण । शत्रुघ्न, आगच्छ । श्रुतकीर्त्याः पाणिम् पाणिना गृहाण । पतिव्रताः छायाः इव एताः युष्मान् अनुगमिष्यन्ति"। इति उक्त्वा राजा तेषाम् हस्तेषु मन्त्रपूतम् उदकम् अपातयत् ।

"सर्वे भवन्तः सौम्याः च सुचरितव्रताः च भार्याभिः तथैव वर्तन्ताम्" इति ।

जनकस्य तत् वचनम् श्रुत्वा चत्वारः वराः चतसृणाम् वधूनाम् हस्तान् हस्तैः अस्पृशन् । सभार्याः अग्निम् वेदीम् राजानम् ऋषीन् च त्रिः प्रदक्षिणी-कृत्य, विधिपूर्वकम् विवाहम् अकुर्वन् ।

---

(३७) सप्तत्रिंशः पाठः ।

एवम् निर्वृत्ते विवाहे, विश्वामित्रः महामुनिः राजानौ आपृच्छ्य स्वम् आश्रमम् अगच्छत् । गते च विश्वामित्रे, दशरथः अपि जनकम् आपृच्छ्य अयोध्याम् उद्दिश्य प्रस्थानम् अकरोत् ।

श्रीमत्सुबोध-संस्कृतम् ।
or Easy Steps to Sanskrit (" Independence " Edition 1955)
by B. B. Kamat



चित्रकार-महाशयाः—श्रीमंत बाळासाहेब पंत प्रतिनिधि (माजी) राजासाहेब (औंध)

अथ अयोध्याम् गच्छतः दशरथस्य परिवारः मार्गे सहसा एव ससंभ्रमः अभवत् । तत्र प्राप्तः जटा-धरः जमदग्नि-पुत्रः परशुरामः तस्य संभ्रमस्य कारणम् । तस्य पिता जमदग्निः केनचित् क्षत्रियेण हतः । तस्मात् तेन क्षत्रियकुलानि अनेकशः उत्सादितानि । 'न खलु दशरथस्य कुलम् अद्य एषः उत्सादयिष्यति' इति सर्वे मिथः अजल्पन् ।

वसिष्ठप्रमुखाः ऋषयः अर्घ्येण जामदग्न्यम् रामम् अपूजयन् । ताम् ऋषिदत्ताम् पूजाम् प्रतिगृह्य, जामदग्न्यः रामः दाशरथिम् रामम् अभ्यभाषत—"राम, दाशरथे राम, श्रुतम् मया तव वीर्यम् । श्रुतम् च तत् शिवधनुषः भेदनम् । पश्य इदम् अपरम् महत् धनुः वैष्णवम् । अस्मिन् बाणम् आरोप्य स्वम् बलम् दर्शय । यदि इच्छसि, द्वन्द्वम् ते दास्यामि" इति ।

(३८) अष्टात्रिंशः पाठः ।

परशुरामस्य तत् वचनम् श्रुत्वा, विषण्णवदनः दीनः बद्धाञ्जलिः दशरथः अवदत्—"भगवन्, मम पुत्राः अद्यापि बालाः एव । बालेभ्यः अभयम् दातुम् अर्हसि । बालेषु हतेषु, कथम् नु वयम् जीवाम ? सर्वविनाशम् मा कुरु" इति । ऋषयः अपि अब्रुवन्

"भगवन्, जामदग्न्य, प्रसीद। क्षमा वीरस्य भूषणम्" इति। क्रुद्धः दाशरथिः तु जामदग्न्यस्य हस्तात् तत् वैष्णवम् धनुः बाणम् च प्रतिगृह्य अवदत्—"यदि माम् अवजानासि, पश्य एतम् मे पराक्रमम्" इति। धनुषि बाणम् च सन्धाय जामदग्न्यम् अब्रवीत्—"अयम् वैष्णवः बाणः मोघः न पतति। ब्राह्मणः असि इति मम पूज्यः। तस्मात् इमम् प्राणहरम् बाणम् त्वयि मोक्तुम् न इच्छामि। तत् कथय मे। कः अन्यः हन्तव्यः?" इति। तत् महत् अद्भुतम् दृष्ट्वा परशुरामः गर्वपरिहारात् जडीकृतः अभवत्।

एवम् निर्जिते परशुरामे, निर्विघ्नः परमहर्षितः दशरथः अयोध्याम् उद्दिश्य प्रस्थितः, तत्र प्राप्तः च। राज-प्रवेश-समये पुरी सिक्त-राजपथा प्रकीर्ण-कुसुमोत्करा नाना-ध्वजालंकृता मङ्गल-वादन-निनादिता जनौघ-समलंकृता च अभवत्। पौरेषु च महान् उत्सवः आसीत्।

(३९) एकोनचत्वारिंशः पाठः।

छात्रः अशोकः—भगवन्, श्रुतम् मया श्रीरामस्य रमणीयम् वृत्तम् विवाहपर्यन्तम्। प्रष्टव्यम् च किञ्चित् भवति,—अपि भवति स्म रामस्य प्रीतिः कथासु?

गुरुः—अथ किम् । विश्वामित्र-समागमे रामेण नानाविधाः चित्राः रम्याः च कथाः श्रुताः एव । यथा । वामनरूपस्य विष्णोः । भगीरथ-प्रयत्नानाम् । नृपस्य विश्वामित्रस्य ब्रह्मर्षिपदगतस्य । तासाम् सर्वासाम् अद्भुतानाम् कथानाम् अत्र अवसरः न विद्यते । श्रवणमात्रेण तृप्तिः अपि न ते भविष्यति । तस्मात् श्रीसुबोध-संस्कृतम् तथा च किञ्चित् व्याकरणम् अपि सम्यक् अधीष्व । अथ सुपरिचितेषु गीर्वाणवाणी-रचना-विशेषेषु, श्रीमद्वाल्मीकीये रामायणे ताः ताः चित्रकथाः समग्रम् च रामचरितम् पठिष्यसि ।

अशोकः—यथाज्ञापयति भवान् ।

रामो राजमणिः सदा विजयते रामं रमेशं भजे ।
रामेणाभिहता निशाचरचमू रामाय तस्मै नमः ॥
रामान्नास्ति परायणं परतरं रामस्य दासोऽस्म्यहम् ।
रामे चित्तलयः सदा भवतु मे भो राम मामुद्धर ॥

तथाऽस्तु । शुभम् भवतु ।

आदौ रामतपोवनाधिगमनम् हत्वा मृगं कांचनम् ।
वैदेही-हरणम् जटायु-मरणम् सुग्रीव-संभाषणम् ॥
वालीनिर्दलनं समुद्रतरणम् लंकापुरी-दाहनम् ।
पश्चाद्रावण-कुंभकर्णहननम् एतद्धि रामायणम् ॥



सुभाषितानि

(सार्थकण्ठपाठार्थम्)

उमादेवी यस्य माता पिता यस्य च शङ्करः ।
मूषको वाहनं यस्य स मां पातु गजाननः ॥
मूकं करोति वाचालं पङ्गुं लङ्घयते गिरिम् । (82)
यत्कृपा तमहं वन्दे परमानंदमाधवम् ॥
वसुदेवसुतं देवं कंसचाणूरमर्दनम् ।
देवकीपरमानंदं कृष्णं वन्दे जगद्गुरुम् ॥
काकः कृष्णः पिकः कृष्णः को भेदः पिक-काकयोः ।
वसन्तसमये प्राप्ते काकः काकः पिकः पिकः ॥ (87)
पुस्तक-स्था तु या विद्या परहस्तगतं धनम् ।
कार्यकाले समुत्पन्ने न सा विद्या न तद् धनम् ॥ (87)
दृष्टिपूतं न्यस्येत् पादं वस्त्रपूतं पिबेज्जलम् । (57 IV)
शास्त्रपूतं वदेद् वाक्यं मनःपूतं समाचरेत् ॥
त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत् ।
ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत् ॥
धनिकः श्रोत्रियो राजा नदी वैद्यस्तु पञ्चमः ।
पञ्च यत्र न वर्तन्ते न तत्र दिवसं वसेत् ॥
यस्मिन्देशे न संमानो न प्रीतिर्न च बान्धवाः ।
न च विद्यागमः कश्चित् तं देशं परिवर्जयेत् ॥
यन्निमित्तं भवेच्छोको दुःखं वा त्रास एव वा ।
आयासो वा यतः शूलस्तदेकाङ्गमपि त्यजेत् ॥
सुलभाः पुरुषा राजन् सततं प्रियवादिनः । (8)
अप्रियस्य च पथ्यस्य वक्ता श्रोता च दुर्लभः ॥ (5)
दुर्जनः प्रियवादी च नैतद्विश्वासकारणम् । (8)
मधु तिष्ठति जिह्वाग्रे हृदये तु हलाहलम् ॥
उपकारोऽपि नीचानामपकाराय जायते ।
पयःपानं भुजङ्गानां केवलं विषवर्धनम् ॥
सर्पः क्रूरः खलः क्रूरः सर्पात्क्रूरतरः खलः । (88)
मन्त्रेण शाम्यते सर्पो न खलः शाम्यते कदा ॥ (62)

येषां न विद्या न तपो न दानं ज्ञानं न शीलं न गुणो न धर्मः ।
ते मर्त्यलोके भुवि भारभूता मनुष्यरूपेण मृगाश्चरन्ति ॥
यद्यद् आचरति श्रेष्ठस्तत्तदेवेतरो जनः ।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ॥
अलंकारप्रियो विष्णुरभिषेकप्रियः शिवः ।
नमस्कारप्रियो भानुर्ब्राह्मणो भोजनप्रियः ॥
काव्यशास्त्रविनोदेन कालो गच्छति धीमताम् (9)
व्यसनेन तु मूर्खाणां निद्रया कलहेन वा ॥
अलसस्य कुतो विद्याऽविद्यस्य च कुतो धनम् ।
अधनस्य कुतो मित्रं अमित्रस्य कुतः सुखम् ॥
अधमा धनमिच्छन्ति धनमानौ च मध्यमाः ।
उत्तमा मानमिच्छन्ति मानो हि महताम् धनम्॥ (10)
अनारम्भो हि कार्याणां प्रथमं बुद्धिलक्षणम् ।
प्रारब्धस्यान्तगमनं द्वितीयं बुद्धिलक्षणम् ॥
प्रारभ्यते न खलु विघ्नभयेन नीचैः
प्रारभ्य विघ्नविहता विरमन्ति मध्याः ।
विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः (68)
प्रारब्धमुत्तमजनाः न परित्यजन्ति ॥
एते सत्पुरुषाः परार्थघटकाः स्वार्थान्परित्यज्य ये
सामान्यास्तु परार्थमुद्यमभृतः स्वार्थाविरोधेन ये ।
तेऽमी मानवराक्षसाः परहितं स्वार्थाय निघ्नन्ति ये
ये तु घ्नन्ति निरर्थकं परहितं ते के न जानीमहे ॥
संभ्रमः स्नेहमाख्याति वपुराख्याति भोजनम् ।
विनयो वंशमाख्याति देशमाख्याति भाषितम् ॥
शैले शैले न माणिक्यं मौक्तिकं न गजे गजे । [प्रतिशैलम्]
साधवो न हि सर्वत्र चन्दनं न वने वने ॥
अस्मासु कलहे प्राप्ते वयं पञ्च शतं च ते । (40)
अन्यैस्तु कलहे प्राप्ते वयं पञ्चाधिकं शतम् ॥
आपदि मित्रपरीक्षा शूरपरीक्षा रणाङ्गणे भवति । (22)
विनये वंशपरीक्षा स्त्रियः परीक्षा धनक्षये भवति ॥
ययोरेव समं वित्तं ययोरेव समं कुलम् ।
तयोर्मैत्री विवाहश्च न तु पुष्ट-विपुष्टयोः ॥

उदारस्य तृणं वित्तं शूरस्य मरणं तृणम् ।
विरक्तस्य तृणं भार्या निस्पृहस्य तृणं जगत् ॥
शतेषु जायते शूरः सहस्रेषु च पण्डितः ।
वक्ता दशसहस्रेषु दाता लक्षेषु वा न वा ॥ (३)
गुरुशुश्रूषया विद्या पुष्कलेन धनेन वा ।
अथवा विद्यया विद्या चतुर्थी नोपलभ्यते ॥
विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं
विद्या भोगकरी यशःसुखकरी विद्या गुरूणां गुरुः ।
विद्या बन्धुजनो विदेशगमने विद्या परा देवता
विद्या राजसु पूजिता न तु धनं विद्याविहीनः पशुः ॥
स्वगृहे पूज्यते मूर्खः स्वग्रामे पूज्यते प्रभुः ।
स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते ॥ (62)
प्रदोषे दीपकश्चन्द्रः प्रभाते दीपको रविः ।
त्रैलोक्ये दीपको धर्मः सुपुत्रः कुल-दीपकः ॥
कोकिलानां स्वरो रूपं नारीरूपं पतिव्रतम् ।
विद्या रूपं कुरूपाणां क्षमा रूपं तपस्विनाम् ॥
विरला जानन्ति गुणान् विरलाः कुर्वन्ति निर्धने स्नेहम् ।
विरलाः परकार्यरताः परदुःखेनापि दुःखिता विरलाः ॥
गुणी गुणं वेत्ति न वेत्ति निर्गुणो
बली बलं वेत्ति न वेत्ति निर्बलः । (४)

आकाशात्पतितं तोयं यथा गच्छति सागरम् ।
सर्वदेवनमस्कारः केशवं प्रति गच्छति ॥

कायेन वाचा मनसेन्द्रियैर्वा बुध्यात्मना वा प्रकृतिस्वभावात् ।
करोमि यद्यत् सकलं परस्मै नारायणायेति समर्पयामि ॥

शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं
विश्वाधारं गगनसदृशं मेघवर्णं शुभांगम् ।
लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यं
वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥

श्री

धन्यवाद—इस पुस्तक के व्याकरण विभाग, शब्दकोश आदि के हिन्दी अनुवाद के कार्य में, तथा उसकी छपाई के शुद्धिकरण के कार्य में, पूना के **रामभाऊ काशिनाथराव गोरे** एम. ए. (हिन्दी, काशी हिन्दी विश्वविद्यालय); बी. एस्. सी.; साहित्यविशारद (प्रयाग), इनसे बहुमूल्य सहायता प्राप्त हुई है, जिसके लिये आप को लेखक की ओर से हार्दिक धन्यवाद दिये जाते हैं।

अथ व्याकरण-विभागः ।

सूचनाः—इस प्रारंभिक पुस्तकमें अपवाद प्रायः छोड दिये गये हैं।



संस्कृत भाषा में,—

(१) विभक्तियाँ (cases) आठ होती हैं जिनके नाम नीचे दिये जाते हैं।

(हिन्दी)	(संस्कृत)	(हिन्दी)	(संस्कृत)
(१) (कर्ता-कारक)	प्रथमा विभक्तिः	(५) (अपादान-कारक)	पञ्चमी वि०
(२) (कर्म-कारक)	द्वितीया ,,	(६) (संबन्ध-कारक)	षष्ठी ,,
(३) (करण-कारक)	तृतीया ,,	(७) (अधिकरण-कारक)	सप्तमी ,,
(४) (संप्रदान-कारक)	चतुर्थी ,,	(८) (संबोधन-कारक)	संबोधनम्

(इस पुस्तक में, " प्रथमा, " " द्वितीया, " आदि संस्कृत संज्ञाएँ मात्र काम में लायी जाएँगी।

(२) वचन (numbers) तीन होते हैं,—

एकवचनम्, द्विवचनम्, बहुवचनम् ।

सभी भारतीय भाषाओं में सिर्फ़ दो वचन होते हैं,—

एकवचन और बहुवचन (या अनेकवचन)

(३) लिंग (genders) तीन होते हैं,—

पुँल्लिंगम्, स्त्रीलिंगम्, नपुंसकलिंगम्

हिन्दी में दो ही लिंग होते हैं,— (पुँल्लिंग और स्त्रीलिंग)

अथ शब्दरूपावलिः—(सुबन्त)

(संज्ञाएँ और विशेषण आदि)

अथ पुँल्लिंगिनः शब्दाः—

(१) वालक (लड़का)

(एक)	(दो)	(तीन और तीनसे ज़्यादा)	
एकवचनम्	द्विवचनम्	वहुवचनम्	
१ वालकः	वालकौ	वालकाः	प्रथमा
२ वालकम्	वालकौ	वालकान्	द्वितीया
३ वालकेन	वालकाभ्याम्	वालकैः	तृतीया
४ वालकाय	वालकाभ्याम्	वालकेभ्यः	चतुर्थी
५ वालकात्	वालकाभ्याम्	वालकेभ्यः	पञ्चमी
६ वालकस्य	वालकयोः	वालकानाम्	षष्ठी
७ वालके	वालकयोः	वालकेषु	सप्तमी
८ हे वालक	हे वालकौ	हे वालकाः	संबोधनम्

इसी प्रकार रामः, विश्वामित्रः, राक्षसः, अश्वः, आदि।

(२) मुनि (ऋषि)

१ मुनिः	मुनी	मुनयः	प्रथमा
२ मुनिम्	मुनी	मुनीन्	द्वितीया
३ मुनिना	मुनिभ्याम्	मुनिभिः	तृतीया
४ मुनये	मुनिभ्याम्	मुनिभ्यः	चतुर्थी
५ मुनेः	मुनिभ्याम्	मुनिभ्यः	पञ्चमी
६ मुनेः	मुन्योः	मुनीनाम्	षष्ठी
७ मुनौ	मुन्योः	मुनिषु	सप्तमी
८ हे मुने	हे मुनी	हे मुनयः	संबोधनम्

इसी प्रकार रविः, अतिथिः आदि।

(३) गुरु (गुरु)

१ गुरुः	गुरू	गुरवः	प्रथमा
२ गुरुम्	गुरू	गुरून्	द्वितीया

एकवचनम्	द्विवचनम्	बहुवचनम्	
३ गुरुणा	गुरुभ्याम्	गुरुभिः	तृतीया
४ गुरवे	गुरुभ्याम्	गुरुभ्यः	चतुर्थी
५ गुरोः	गुरुभ्याम्	गुरुभ्यः	पञ्चमी
६ गुरोः	गुर्वोः	गुरूणाम्	षष्ठी
७ गुरौ	गुर्वोः	गुरुषु	सप्तमी
८ हे गुरो	हे गुरू	हे गुरवः	संबोधनम्

इसी प्रकार भानुः, सुबाहुः, आदि ।

(४) पितृ (बाप)

१ पिता	पितरौ	पितरः	प्रथमा
२ पितरम्	पितरौ	पितॄन्	द्वितीया
३ पित्रा	पितृभ्याम्	पितृभिः	तृतीया
४ पित्रे	पितृभ्याम्	पितृभ्यः	चतुर्थी
५ पितुः	पितृभ्याम्	पितृभ्यः	पञ्चमी
६ पितुः	पित्रोः	पितॄणाम्	षष्ठी
७ पितरि	पित्रोः	पितृषु	सप्तमी
८ हे पितर्	हे पितरौ	हे पितरः	संबोधनम्

इसी प्रकार भ्रातृ, जामातृ आदि ।

(५) कर्तृ (करनेवाला)

१ कर्ता	कर्तारौ	कर्तारः	प्रथमा
२ कर्तारम्	कर्तारौ	कर्तॄन्	द्वितीया
३ कर्त्रा	कर्तृभ्याम्	कर्तृभिः	तृतीया
४ कर्त्रे	कर्तृभ्याम्	कर्तृभ्यः	चतुर्थी
५ कर्तुः	कर्तृभ्याम्	कर्तृभ्यः	पञ्चमी
६ कर्तुः	कर्त्रोः	कर्तॄणाम्	षष्ठी
७ कर्तरि	कर्त्रोः	कर्तृषु	सप्तमी
८ हे कर्तर्	हे कर्तारौ	हे कर्तारः	संबोधनम्

इसी प्रकार भर्तृ, श्रोतृ, रक्षितृ आदि।

(६) राजन् (राजा)

	एकवचनम्	द्विवचनम्	बहुवचनम्	
१	राजा	राजानौ	राजानः	प्रथमा
२	राजानम्	राजानौ	राज्ञः	द्वितीया
३	राज्ञा	राजभ्याम्	राजभिः	तृतीया
४	राज्ञे	राजभ्याम्	राजभ्यः	चतुर्थी
५	राज्ञः	राजभ्याम्	राजभ्यः	पञ्चमी
६	राज्ञः	राज्ञोः	राज्ञाम्	षष्ठी
७	राज्ञि-राजनि	राज्ञोः	राजसु	सप्तमी
८	हे राजन्	हे राजानौ	हे राजानः	संबोधनम्

इसी प्रकार महिमन्, लघिमन्, आदि।

(७) आत्मन् (आप, आत्मा)

१	आत्मा	आत्मानौ	आत्मानः	प्रथमा
२	आत्मानम्	आत्मानौ	आत्मनः	द्वितीया
३	आत्मना	आत्मभ्याम्	आत्मभिः	तृतीया
४	आत्मने	आत्मभ्याम्	आत्मभ्यः	चतुर्थी
५	आत्मनः	आत्मभ्याम्	आत्मभ्यः	पञ्चमी
६	आत्मनः	आत्मनोः	आत्मनाम्	षष्ठी
७	आत्मनि	आत्मनोः	आत्मसु	सप्तमी
८	हे आत्मन्	हे आत्मानौ	हे आत्मानः	संबोधनम्

इसी प्रकार महात्मन्, ब्रह्मन् आदि।

(८) सुखिन् (सुखी)

१	सुखी	सुखिनौ	सुखिनः	प्रथमा
२	सुखिनम्	सुखिनौ	सुखिनः	द्वितीया
३	सुखिना	सुखिभ्याम्	सुखिभिः	तृतीया
४	सुखिने	सुखिभ्याम्	सुखिभ्यः	चतुर्थी
५	सुखिनः	सुखिभ्याम्	सुखिभ्यः	पञ्चमी
६	सुखिनः	सुखिनोः	सुखिनाम्	षष्ठी
७	सुखिनि	सुखिनोः	सुखिषु	सप्तमी
८	हे सुखिन्	हे सुखिनौ	हे सुखिनः	संबोधनम्

इसी प्रकार वनवासिन्, एकाकिन्, पक्षिन्, करिन् आदि।

(९) भगवत् (भाग्यवाला)

	एकवचनम्	द्विवचनम्	बहुवचनम्	
१	भगवान्	भगवन्तौ	भगवन्तः	प्रथमा
२	भगवन्तम्	भगवन्तौ	भगवतः	द्वितीया
३	भगवता	भगवद्भ्याम्	भगवद्भिः	तृतीया
४	भगवते	भगवद्भ्याम्	भगवद्भ्यः	चतुर्थी
५	भगवतः	भगवद्भ्याम्	भगवद्भ्यः	पञ्चमी
६	भगवतः	भगवतोः	भगवताम्	षष्ठी
७	भगवति	भगवतोः	भगवत्सु	सप्तमी
८	हे भगवन्	हे भगवन्तौ	हे भगवन्तः	संबोधनम्

इसी प्रकार भवत, श्रीमत, धीमत, यावत् आदि।

(१०) महत् (बड़ा)

१	महान्	महान्तौ	महान्तः	प्रथमा
८	हे महन्	हे महान्तौ	हे महान्तः	संबोधनम्
२	महान्तम्	महान्तौ	महतः	द्वितीया
३	महता	महद्भ्याम्	महद्भिः	तृतीया

इस के आगे के रूप 'भगवत' की तरह कीजिये।

(११) गच्छन् (जानेवाला) [वर्त० कालवाचक विशेषण]

१	गच्छन्	गच्छन्तौ	गच्छन्तः	प्रथमा
२	गच्छन्तम्	गच्छन्तौ	गच्छतः	द्वितीया
३	गच्छता	गच्छद्भ्याम्	गच्छद्भिः	तृतीया
४	गच्छते	गच्छद्भ्याम्	गच्छद्भ्यः	चतुर्थी
५	गच्छतः	गच्छद्भ्याम्	गच्छद्भ्यः	पञ्चमी
६	गच्छतः	गच्छतोः	गच्छताम्	षष्ठी
७	गच्छति	गच्छतोः	गच्छत्सु	सप्तमी
८	हे गच्छन्	हे गच्छन्तौ	हे गच्छन्तः	संबोधनम्

इसी प्रकार से कुर्वत, वसत, पश्यत, आदि। (देखिये अंक ६६)

(१२) भूभृत् (राजा)

एकवचनम्	द्विवचनम्	बहुवचनम्	
१ भूभृत्	भूभृतौ	भूभृतः	प्रथमा
२ भूभृतम्	भूभृतौ	भूभृतः	द्वितीया
३ भूभृता	भूभृद्भ्याम्	भूभृद्भिः	तृतीया
४ भूभृते	भूभृद्भ्याम्	भूभृद्भ्यः	चतुर्थी
५ भूभृतः	भूभृद्भ्याम्	भूभृद्भ्यः	पञ्चमी
६ भूभृतः	भूभृतोः	भूभृताम्	षष्ठी
७ भूभृति	भूभृतोः	भूभृत्सु	सप्तमी
८ हे भूभृत्	हे भूभृतौ	हे भूभृतः	संबोधनम्

इसी प्रकार मरुत्, सुहृद्, ऋत्विज्, पयोमुच्, आदि।

(१३) चन्द्रमस् (चन्द्र)

१ चन्द्रमाः	चन्द्रमसौ	चन्द्रमसः	प्रथमा
२ चन्द्रमसम्	चन्द्रमसौ	चन्द्रमसः	द्वितीया
३ चन्द्रमसा	चन्द्रमोभ्याम्	चन्द्रमोभिः	तृतीया
४ चन्द्रमसे	चन्द्रमोभ्याम्	चन्द्रमोभ्यः	चतुर्थी
५ चन्द्रमसः	चन्द्रमोभ्याम्	चन्द्रमोभ्यः	पञ्चमी
६ चन्द्रमसः	चन्द्रमसोः	चन्द्रमसाम्	षष्ठी
७ चन्द्रमसि	चन्द्रमसोः	चन्द्रमःसु–मस्सु	सप्तमी
८ हे चन्द्रमः	हे चन्द्रमसौ	हे चन्द्रमसः	संबोधनम्

इसी प्रकार दिवौकस्, वनौकस्, आदि।

(१४) विद्वस् (विद्वान्)

१ विद्वान्	विद्वांसौ	विद्वांसः	प्रथमा
२ विद्वांसम्	विद्वांसौ	विदुषः	द्वितीया
३ विदुषा	विद्वद्भ्याम्	विद्वद्भिः	तृतीया
४ विदुषे	विद्वद्भ्याम्	विद्वद्भ्यः	चतुर्थी
५ विदुषः	विद्वद्भ्याम्	विद्वद्भ्यः	पञ्चमी
६ विदुषः	विदुषोः	विदुषाम्	षष्ठी
७ विदुषि	विदुषोः	विद्वत्सु	सप्तमी
८ हे विद्वन्	हे विद्वांसौ	हे विद्वांसः	संबोधनम्

अथ स्त्रीलिंगिनः शब्दाः ।

(१५) कन्या (कन्या)

	एकवचनम्	द्विवचनम्	बहुवचनम्	
१	कन्या	कन्ये	कन्याः	प्रथमा
२	कन्याम्	कन्ये	कन्याः	द्वितीया
३	कन्यया	कन्याभ्याम्	कन्याभिः	तृतीया
४	कन्यायै	कन्याभ्याम्	कन्याभ्यः	चतुर्थी
५	कन्यायाः	कन्याभ्याम्	कन्याभ्यः	पञ्चमी
६	कन्यायाः	कन्ययोः	कन्यानाम्	षष्ठी
७	कन्यायाम्	कन्ययोः	कन्यासु	सप्तमी
८	हे कन्ये	हे कन्ये	हे कन्याः	संबोधनम्

इसी प्रकार शाला, सीता, कौसल्या आदि।

(१६) भूमि (जमीन)

१	भूमिः	भूमी	भूमयः	प्रथमा
२	भूमिम्	भूमी	भूमीः	द्वितीया
३	भूम्या	भूमिभ्याम्	भूमिभिः	तृतीया
४	भूमये-भूम्यै	भूमिभ्याम्	भूमिभ्यः	चतुर्थी
५	भूमेः-भूम्याः	भूमिभ्याम्	भूमिभ्यः	पञ्चमी
६	भूमेः-भूम्याः	भूम्योः	भूमीनाम्	षष्ठी
७	भूमौ-भूम्याम्	भूम्योः	भूमिषु	सप्तमी
८	हे भूमे	हे भूमी	हे भूमयः	संबोधनम्

इसी प्रकार मतिः, कीर्तिः, आदि।

(१७) नदी (नदी)

१	नदी	नद्यौ	नद्यः	प्रथमा
२	नदीम्	नद्यौ	नदीः	द्वितीया
३	नद्या	नदीभ्याम्	नदीभिः	तृतीया
४	नद्यै	नदीभ्याम्	नदीभ्यः	चतुर्थी
५	नद्याः	नदीभ्याम्	नदीभ्यः	पञ्चमी

एकवचनम्	द्विवचनम्	बहुवचनम्	
६ नद्याः	नद्योः	नदीनाम्	षष्ठी
७ नद्याम्	नद्योः	नदीषु	सप्तमी
८ हे नदि	हे नद्यौ	हे नद्यः	संबोधनम्

इसी प्रकार कैकयी, दासी, आदि।

(१८) धेनु (गौ)

१ धेनुः	धेनू	धेनवः	प्रथमा
२ धेनुम्	धेनू	धेनूः	द्वितीया
३ धेन्वा	धेनुभ्याम्	धेनुभिः	तृतीया
४ धेनवे-धेन्वै	धेनुभ्याम्	धेनुभ्यः	चतुर्थी
५ धेनोः-धेन्वाः	धेनुभ्याम्	धेनुभ्यः	पञ्चमी
६ धेनोः-धेन्वाः	धेन्वोः	धेनूनाम्	षष्ठी
७ धेनौ-धेन्वाम्	धेन्वोः	धेनुषु	सप्तमी
८ हे धेनो	हे धेनू	हे धेनवः	संबोधनम्

(१९) वधू (वधू)

१ वधूः	वध्वौ	वध्वः	प्रथमा
२ वधूम्	वध्वौ	वधूः	द्वितीया
३ वध्वा	वधूभ्याम्	वधूभिः	तृतीया
४ वध्वै	वधूभ्याम्	वधूभ्यः	चतुर्थी
५ वध्वाः	वधूभ्याम्	वधूभ्यः	पञ्चमी
६ वध्वाः	वध्वोः	वधूनाम्	षष्ठी
७ वध्वाम्	वध्वोः	वधूषु	सप्तमी
८ हे वधु	हे वध्वौ	हे वध्वः	संबोधनम्

इसी प्रकार श्वश्रू, चमू, आदि।

(२०) मातृ (माँ)

१ माता	मातरौ	मातरः	प्रथमा
२ मातरम्	मातरौ	मातॄः	द्वितीया
३ मात्रा	मातृभ्याम्	मातृभिः	तृतीया
४ मात्रे	मातृभ्याम्	मातृभ्यः	चतुर्थी

एकवचनम्	द्विवचनम्	बहुवचनम्	
५ मातुः	मातृभ्याम्	मातृभ्यः	पञ्चमी
६ मातुः	मात्रोः	मातृणाम्	षष्ठी
७ मातरि	मात्रोः	मातृषु	सप्तमी
८ हे मातर्	हे मातरौ	हे मातरः	संबोधनम्

इसी प्रकार दुहितृ, ननान्दृ, आदि।

(२१) स्वसृ (बहेन)

१ स्वसा	स्वसारौ	स्वसारः	प्रथमा
२ स्वसारम्	स्वसारौ	स्वसृः	द्वितीया
३ स्वस्रा	स्वसृभ्याम्	स्वसृभिः	तृतीया
४ स्वस्रे	स्वसृभ्याम्	स्वसृभ्यः	चतुर्थी
५ स्वसुः	स्वसृभ्याम्	स्वसृभ्यः	पञ्चमी
६ स्वसुः	स्वस्रोः	स्वसृणाम्	षष्ठी
७ स्वसरि	स्वस्रोः	स्वसृषु	सप्तमी
८ हे स्वसर्	हे स्वसारौ	हे स्वसारः	संबोधनम्

(२२) सरित् (नदी)

१ सरित्	सरितौ	सरितः	प्रथमा
२ सरितम्	सरितौ	सरितः	द्वितीया
३ सरिता	सरिद्भ्याम्	सरिद्भिः	तृतीया
४ सरिते	सरिद्भ्याम्	सरिद्भ्यः	चतुर्थी
५ सरितः	सरिद्भ्याम्	सरिद्भ्यः	पञ्चमी
६ सरितः	सरितोः	सरिताम्	षष्ठी
७ सरिति	सरितोः	सरित्सु	सप्तमी
८ हे सरित्	हे सरितौ	हे सरितः	संबोधनम्,

इसी प्रकार आपद् क्षुध् आदि।

(२३) वाच् (वाणी)

१ वाक्	वाचौ	वाचः	प्रथमा
२ वाचम्	वाचौ	वाचः	द्वितीया
३ वाचा	वाग्भ्याम्	वाग्भिः	तृतीया

एकवचनम्	द्विवचनम्	बहुवचनम्	
४ वाचे	वाग्भ्याम्	वाग्भ्यः	चतुर्थी
५ वाचः	वाग्भ्याम्	वाग्भ्यः	पञ्चमी
६ वाचः	वाचोः	वाचाम्	षष्ठी
७ वाचि	वाचोः	वाक्षु	सप्तमी
८ हे वाक्	हे वाचौ	हे वाचः	संबोधनम्

इसी प्रकार स्रज् आदि।

अथ नपुंसकलिंगिनः शब्दाः।

(२४) वनम् (वन, अरण्य)

१ वनम्	वने	वनानि	प्रथमा
२ वनम्	वने	वनानि	द्वितीया
३ वनेन	वनाभ्याम्	वनैः	तृतीया
४ वनाय	वनाभ्याम्	वनेभ्यः	चतुर्थी
५ वनात्	वनाभ्याम्	वनेभ्यः	पञ्चमी
६ वनस्य	वनयोः	वनानाम्	षष्ठी
७ वने	वनयोः	वनेषु	सप्तमी
८ हे वन	हे वने	हे वनानि	संबोधनम्

इसी प्रकार मित्रम्, जलम्, आदि।

(२५) वारि (जल)

१ वारि	वारिणी	वारीणि	प्रथमा
२ वारि	वारिणी	वारीणि	द्वितीया
३ वारिणा	वारिभ्याम्	वारिभिः	तृतीया
४ वारिणे	वारिभ्याम्	वारिभ्यः	चतुर्थी
५ वारिणः	वारिभ्याम्	वारिभ्यः	पञ्चमी
६ वारिणः	वारिणोः	वारीणाम्	षष्ठी
७ वारिणि	वारिणोः	वारिषु	सप्तमी
८ हे वारे, हे वारि	हे वारिणी	हे वारीणि	संबोधनम्

इसी प्रकार सुधि आदि।

(२६)　　　　मधु (मध)

एकवचनम्	द्विवचनम्	बहुवचनम्	
१ मधु	मधुनी	मधूनि	प्रथमा
२ मधु	मधुनी	मधूनि	द्वितीया
३ मधुना	मधुभ्याम्	मधुभिः	तृतीया
४ मधुने	मधुभ्याम्	मधुभ्यः	चतुर्थी
५ मधुनः	मधुभ्याम्	मधुभ्यः	पञ्चमी
६ मधुनः	मधुनोः	मधूनाम्	षष्ठी
७ मधुनि	मधुनोः	मधुषु	सप्तमी
८ हे मधो, हे मधु	हे मधुनी	हे मधूनि	संबोधनम्

इसी प्रकार वस्तु, गुरु, इत्यादि (नपुंसकलिंगी विशेषण)

(२७)　　　　कर्तृ (विशेषण)

१ कर्तृ	कर्तृणी	कर्तॄणि	प्रथमा
२ कर्तृ	कर्तृणी	कर्तॄणि	द्वितीया
३ कर्तृणा	कर्तृभ्याम्	कर्तृभिः	तृतीया
४ कर्तृणे	कर्तृभ्याम्	कर्तृभ्यः	चतुर्थी
५ कर्तृणः	कर्तृभ्याम्	कर्तृभ्यः	पञ्चमी
६ कर्तृणः	कर्तृणोः	कर्तॄणाम्	षष्ठी
७ कर्तृणि	कर्तृणोः	कर्तृषु	सप्तमी
८ हे कर्तृ	हे कर्तृणी	हे कर्तॄणि	संबोधनम्

(२८)　　　　जगत् (जग)

१ जगत्	जगती	जगन्ति	प्रथमा
२ जगत्	जगती	जगन्ति	द्वितीया
३ जगता	जगद्भ्याम्	जगद्भिः	तृतीया
४ जगते	जगद्भ्याम्	जगद्भ्यः	चतुर्थी
५ जगतः	जगद्भ्याम्	जगद्भ्यः	पञ्चमी
६ जगतः	जगतोः	जगताम्	षष्ठी
७ जगति	जगतोः	जगत्सु	सप्तमी
८ हे जगत्	हे जगती	हे जगन्ति	संबोधनम्

(२९) महत् (बड़ा)

एकवचनम्	द्विवचनम्	बहुवचनम्	
१ महत्	महती	महान्ति	प्रथमा
८ हे महत्	हे महती	हे महान्ति	संबोधनम्
२ महत्	महती	महान्ति	द्वितीया

इस के आगे के रूप ' जगत् ' तरह कीजिये ।

(३०) पयस् (जल, दूध)

१ पयः	पयसी	पयांसि	प्रथमा
२ पयः	पयसी	पयांसि	द्वितीया
३ पयसा	पयोभ्याम्	पयोभिः	तृतीया
४ पयसे	पयोभ्याम्	पयोभ्यः	चतुर्थी
५ पयसः	पयोभ्याम्	पयोभ्यः	पञ्चमी
६ पयसः	पयसोः	पयसाम्	षष्ठी
७ पयसि	पयसोः	पयःसु-यस्सु	सप्तमी
८ हे पयः	हे पयसी	हे पयांसि	संबोधनम्

इसी प्रकार यशस्, तमस्, नभस्, रक्षस्, मनस् आदि ।

(३१) धनुस् (कमान)

१ धनुः	धनुषी	धनूंषि	प्रथमा
२ धनुः	धनुषी	धनूंषि	द्वितीया
३ धनुषा	धनुर्भ्याम्	धनुर्भिः	तृतीया
४ धनुषे	धनुर्भ्याम्	धनुर्भ्यः	चतुर्थी
५ धनुषः	धनुर्भ्याम्	धनुर्भ्यः	पञ्चमी
६ धनुषः	धनुषोः	धनुषाम्	षष्ठी
७ धनुषि	धनुषोः	धनुःषु-नुष्षु	सप्तमी
८ हे धनुः	हे धनुषी	हे धनूंषि	संबोधनम्

इसी प्रकार चक्षुस् आदि ।

(३२) नामन् (नाम)

	एकवचनम्	द्विवचनम्	बहुवचनम्	
१	नाम	नामनी–नाम्नी	नामानि	प्रथमा
२	नाम	नामनी–नाम्नी	नामानि	द्वितीया
३	नाम्ना	नामभ्याम्	नामभिः	तृतीया
४	नाम्ने	नामभ्याम्	नामभ्यः	चतुर्थी
५	नाम्नः	नामभ्याम्	नामभ्यः	पञ्चमी
६	नाम्नः	नाम्नोः	नाम्नाम्	षष्ठी
७	नामनि-नाम्नि	नाम्नोः	नामसु	सप्तमी
८	हे नामन्-हे नाम	हे नामनी-नाम्नी	हे नामानि	संबोधनम्

इसी प्रकार हेमन, व्योमन, प्रेमन, आदि ।

(३३) सद्मन् (घर)

१	सद्म	सद्मनी	सद्मानि	प्रथमा
२	सद्म	सद्मनी	सद्मानि	द्वितीया
३	सद्मना	सद्मभ्याम्	सद्मभिः	तृतीया
४	सद्मने	सद्मभ्याम्	सद्मभ्यः	चतुर्थी
५	सद्मनः	सद्मभ्याम्	सद्मभ्यः	पञ्चमी
६	सद्मनः	सद्मनोः	सद्मनाम्	षष्ठी
७	सद्मनि	सद्मनोः	सद्मसु	सप्तमी
८	हे सद्मन् हे सद्म	सद्मनी	हे सद्मानि	संबोधनम्

इसी प्रकार चर्मन्, वर्मन, जन्मन, आदि ।

अथ सर्वनामानि (Pro-nouns)

(३४) पुरुषवाचक सर्वनामानि (Personal pronouns)

(एक)		(दो)			(तीन और तीनसे ज़्यादा)	
(मैं) अहम्	(४०)	हम	आवाम्	we	हम	वयम् (४०)
(तू) त्वम्	(४१)	तुम	युवाम्	you	तुम	यूयम् (४१)
(वह) सः he	(४२)	वे	तौ	they	वे	ते (४२)
(„) सा she	(४३)	„	ते	„	„	ताः (४३)
(„) तत् it	(४४)	„	ते	„	„	तानि (४४)

(३५) दर्शक-सर्वनामानि (Demonstrative pron.) (निश्चयवाचक)

	(१) (एतत्) (=this)	(२) (इदम्) (=this)	(३) (अदस्) (=that)	(४) (तद्) (=that)
पु०	एषः	अयम्	असौ	सः
स्त्री०	एषा	इयम्	असौ	सा
नपुं०	एतत्	इदम्	अदः	तत्

(१) points to the nearest object. (निकटवर्ति)
बहुत समीपका पदार्थ दिखाता है। (४५, ४६, ४७)

(२) points to an object further off; but still at hand. (निकटवर्ति)
समीपका ही, पर थोडा दूरका पदार्थ दिखाता है। (४८, ४९, ५०).

(३) points to an object at a distance. (दूरवर्ति)
कुछ फ़ासलेपर होनेवाला पदार्थ दिखाता है। (५१, ५२, ५३)

(४) refers to an object at a farther distance and the latter may even be absent. (दूरवर्ति)
दूरका, या परोक्ष पदार्थ दिखाता है। (४२, ४३, ४४)

इदमस्तु (२) सन्निकृष्टं, (१) समीपतरवर्ति चैतदो रूपम्।
अदसस्तु (३) विप्रकृष्टं, तदिति (४) परोक्षे विजानीयात्॥

(३६) संबंधि-सर्वनामानि (Relative pronouns)

who which (४२, ४३, ४४).
यः या यत्

(३७) प्रश्नार्थक-सर्वनामानि (Interrogative pronouns)

who ? which ? (४२, ४३, ४४)
कः ? का ? किम्

(३८) सामान्य सर्वनामानि (Indefinite prons. "some one")

कश्चित् काचित् किञ्चित् (११३)
(कः + चित्) (का + चित्) (किम् + चित्)

(३९) इतराणि (others)—सर्व, विश्व, अन्य इ. (५४, ५५, ५६)

(४०) अस्मद्

एकवचनम्	द्विवचनम्	बहुवचनम्	
१ अहम्	आवाम्	वयम्	प्रथमा
२ माम्, मा	आवाम्, नौ	अस्मान, नः	द्वितीया
३ मया	आवाभ्याम्	अस्माभिः	तृतीया
४ मह्यम्, मे	आवाभ्याम्, नौ	अस्मभ्यम्, नः	चतुर्थी
५ मत्	आवाभ्याम्	अस्मत्	पञ्चमी
६ मम, मे	आवयोः, नौ	अस्माकम्, नः	षष्ठी
७ मयि	आवयोः	अस्मासु	सप्तमी

(४१) युष्मद्

१ त्वम्	युवाम्	यूयम्	प्रथमा
२ त्वाम्, त्वा	युवाम्, वाम्	युष्मान्, वः	द्वितीया
३ त्वया	युवाभ्याम्	युष्माभिः	तृतीया
४ तुभ्यम्, ते	युवाभ्याम्, वाम्	युष्मभ्यम्, वः	चतुर्थी
५ त्वत्	युवाभ्याम्	युष्मत्	पञ्चमी
६ तव, ते	युवयोः, वाम्	युष्माकम्, वः	षष्ठी
७ त्वयि	युवयोः	युष्मासु	सप्तमी

(४२) पुँल्लिंगम् [(i) यद्, (ii) तद्, (iii) किम्] (४३) स्त्रीलिंगम्

		एक-व०	द्वि-व०	बहु-व०	एक-व०	द्वि-व०	बहु-व०
(१) यत्	(i)	यः	यौ	ये	या	ये	याः
तत्	(ii)	सः	तौ	ते	सा	ते	ताः
किम्	(iii)	कः ?	कौ ?	के ?	का ?	के ?	काः ?
(२)	(i)	यम्	यौ	यान्	याम्	ये	याः
	(ii)	तम्	तौ	तान्	ताम्	ते	ताः
	(iii)	कम् ?	कौ ?	कान्?	काम् ?	के ?	काः ?
(३)	(i)	येन	याभ्याम्	यैः	यया	याभ्याम्	याभिः
	(ii)	तेन	ताभ्याम्	तैः	तया	ताभ्याम्	ताभिः
	(iii)	केन ?	काभ्याम् ?	कैः ?	कया ?	काभ्याम् ?	काभिः ?

		एक-व०	द्वि-व०	बहु-व०	एक-व०	द्विव	बहु-व०
(४)	(i)	यस्मै	याभ्याम्	येभ्यः	यस्यै	याभ्याम्	याभ्यः
	(ii)	तस्मै	ताभ्याम्	तेभ्यः	तस्यै	ताभ्याम्	ताभ्यः
	(iii)	कस्मै ?	काभ्याम् ?	केभ्यः ?	कस्यै ?	काभ्याम्?	काभ्यः ?
(५)	(i)	यस्मात्	याभ्याम्	येभ्यः	यस्याः	याभ्याम्	याभ्यः
	(ii)	तस्मात्	ताभ्याम्	तेभ्यः	तस्याः	ताभ्याम्	ताभ्यः
	(iii)	कस्मात्?	काभ्याम्?	केभ्यः?	कस्याः ?	काभ्याम् ?	काभ्यः ?
(६)	(i)	यस्य	ययोः	येषाम्	यस्याः	ययोः	यासाम्
	(ii)	तस्य	तयोः	तेषाम्	तस्याः	तयोः	तासाम्
	(iii)	कस्य ?	कयोः ?	केषाम्?	कस्याः ?	कयोः ?	कासाम् ?
(७)	(i)	यस्मिन्	ययोः	येषु	यस्याम्	ययोः	यासु
	(ii)	तस्मिन्	तयोः	तेषु	तस्याम्	तयोः	तासु
	(iii)	कस्मिन्?	कयोः ?	केषु ?	कस्याम् ?	कयोः ?	कासु

(४४) नपुंसकलिंगम्

प्रथमा और	(i)	यत्	ये	यानि
द्वितीया	(ii)	तत्	ते	तानि
	(iii)	किम् ?	के ?	कानि ?

तृतीया, चतुर्थी, (करण, संप्रदान), वगैरह विभक्तियों के रूप ऊपर दिये हुए पुँल्लिंगी रूप के समान होते हैं। वे इस तरह हैं।

(i)	येन	याभ्याम्	यैः
(ii)	तेन	ताभ्याम्	तैः
(iii)	केन ?	काभ्याम् ?	कैः इत्यादि

सूचना— (१) ऊपर दिए हुए, और आगे आनेवाले सब सर्वनामों के पुल्लिंगी और नपुंसकलिंगी रूपों की तुलना कीजिये। और उन का फ़र्क ध्यान में रखने की आदत रखिये।

(२) इन सब सर्वनामों से साधित किये गये उपयोगी शब्द (११९, ११८) में दिये गये हैं वे देखिये।

(४५) एतद् (पुँल्लिंगम्)

	एकवचनम्	द्विवचनम्	बहुवचनम्	
१	एषः	एतौ	एते	
२	एतम्, एनम्	एतौ, एनौ	एतान्, एनान्	द्वितीया
३	एतेन, एनेन	एताभ्याम्	एतैः	तृतीया
४	एतस्मै	एताभ्याम्	एतेभ्यः	चतुर्थी
५	एतस्मात्	एताभ्याम्	एतेभ्यः	पञ्चमी
६	एतस्य	एतयोः, एनयोः	एतेषाम्	षष्ठी
७	एतस्मिन्	एतयोः, एनयोः	एतेषु	सप्तमी

(४६) एतद् (स्त्रीलिंगम्)

१	एषा	एते	एताः	प्रथमा
२	एताम्, एनाम्	एते, एने	एताः, एनाः	द्वितीया
३	एतया, एनया	एताभ्याम्	एताभिः	तृतीया
४	एतस्यै	एताभ्याम्	एताभ्यः	चतुर्थी
५	एतस्याः	एताभ्याम्	एताभ्यः	पञ्चमी
६	एतस्याः	एतयोः, एनयोः	एतासाम्	षष्ठी
७	एतस्याम्	एतयोः, एनयोः	एतासु	सप्तमी

(४७) एतद् (नपुंसकलिंगम्)

१	एतत्	एते	एतानि	प्रथमा
२	एतत्, एनत्	एते, एने	एतानि, एनानि	द्वितीया
३	एतेन, एनेन	एताभ्याम्	एतैः	तृतीया
४	एतस्मै	एताभ्याम्	एतेभ्यः	चतुर्थी
५	एतस्मात्	एताभ्याम्	एतेभ्यः	पञ्चमी
६	एतस्य	एतयोः, एनयोः	एतेषाम्	षष्ठी
७	एतस्मिन्	एतयोः, एनयोः	एतेषु	सप्तमी

(४८) इदम् (पुँल्लिंगम्)

१	अयम्	इमौ	इमे	प्रथमा
२	इमम्, एनम्	इमौ, एनौ	इमान्, एनान्	द्वितीया
३	अनेन, एनेन	आभ्याम्	एभिः	तृतीया

एकवचनम्	द्विवचनम्	बहुवचनम्	
४ अस्मै	आभ्याम्	एभ्यः	चतुर्थी
५ अस्मात्	आभ्याम्	एभ्यः	पञ्चमी
६ अस्य	अनयोः एनयोः	एषाम्	षष्ठी
७ अस्मिन्	अनयोः, एनयोः	एषु	सप्तमी

(४९) इदम् (स्त्रीलिंगम्)

१ इयम्	इमे	इमाः	प्रथमा
२ इमाम्, एनाम्	इमे, एने	इमाः एनाः	द्वितीया
३ अनया, एनया	आभ्याम्	आभिः	तृतीया
४ अस्यै	आभ्याम्	आभ्यः	चतुर्थी
५ अस्याः	आभ्याम्	आभ्यः	पञ्चमी
६ अस्याः	अनयोः, एनयोः	आसाम्	षष्ठी
७ अस्याम्	अनयोः, एनयोः	आसु	सप्तमी

(५०) इदम् (नपुंसकलिंगम्)

१ इदम्	इमे	इमानि	प्रथमा
२ इदम्, एनत्	इमे, एने	इमानि, एनानि	द्वितीया
३ अनेन, एनेन	आभ्याम्	एभिः	तृतीया
४ अस्मै	आभ्याम्	एभ्यः	चतुर्थी
५ अस्मात्	आभ्याम्	एभ्यः	पञ्चमी
६ अस्य	अनयोः, एनयोः	एषाम्	षष्ठी
७ अस्मिन्	अनयोः, एनयोः	एषु	सप्तमी

(५१) अदस् (पुंल्लिंगम्)

१ असौ	अमू	अमी	प्रथमा
२ अमुम्	अमू	अमून्	द्वितीया
३ अमुना	अमूभ्याम्	अमीभिः	तृतीया
४ अमुष्मै	अमूभ्याम्	अमीभ्यः	चतुर्थी
५ अमुष्मात्	अमूभ्याम्	अमीभ्यः	पञ्चमी
६ अमुष्य	अमुयोः	अमीषाम्	षष्ठी
७ अमुष्मिन्	अमुयोः	अमीषु	सप्तमी

(५२) अदस् (स्त्रीलिंगम्)

	एकवचनम्	द्विवचनम्	बहुवचनम्	
१	असौ	अमू	अमूः	प्रथमा
२	अमूम्	अमू	अमूः	द्वितीया
३	अमुया	अमूभ्याम्	अमूभिः	तृतीया
४	अमुष्यै	अमूभ्याम्	अमूभ्यः	चतुर्थी
५	अमुष्याः	अमूभ्याम्	अमूभ्यः	पञ्चमी
६	अमुष्याः	अमुयोः	अमूषाम्	षष्ठी
७	अमुष्याम्	अमुयोः	अमूषु	सप्तमी

(५३) अदस् (नपुंसकलिंगम्)

१	अदः	अमू	अमूनि	प्रथमा
२	अदः	अमू	अमूनि	द्वितीया
३	अमुना	अमूभ्याम्	अमीभिः	तृतीया
४	अमुष्मै	अमूभ्याम्	अमीभ्यः	चतुर्थी
५	अमुष्मात्	अमूभ्याम्	अमीभ्यः	पञ्चमी
६	अमुष्य	अमुयोः	अमीषाम्	षष्ठी
७	अमुष्मिन्	अमुयोः	अमीषु	सप्तमी

(५४) सर्व (पुँल्लिंगम्)

१	सर्वः	सर्वौ	सर्वे	प्रथमा
२	सर्वम्	सर्वौ	सर्वान्	द्वितीया
३	सर्वेण	सर्वाभ्याम्	सर्वैः	तृतीया
४	सर्वस्मै	सर्वाभ्याम्	सर्वेभ्यः	चतुर्थी
५	सर्वस्मात्	सर्वाभ्याम्	सर्वेभ्यः	पञ्चमी
६	सर्वस्य	सर्वयोः	सर्वेषाम्	षष्ठी
७	सर्वस्मिन्	सर्वयोः	सर्वेषु	सप्तमी

(५५) सर्व (स्त्रीलिंगम्)

१	सर्वा	सर्वे	सर्वाः	प्रथमा
२	सर्वाम्	सर्वे	सर्वाः	द्वितीया

एकवचनम्	द्विवचनम्	वहुवचनम्	
३ सर्वया	सर्वाभ्याम्	सर्वाभिः	तृतीया
४ सर्वस्यै	सर्वाभ्याम्	सर्वाभ्यः	चतुर्थी
५ सर्वस्याः	सर्वाभ्याम्	सर्वाभ्यः	पञ्चमी
६ सर्वस्याः	सर्वयोः	सर्वासाम्	षष्ठी
७ सर्वस्याम्	सर्वयोः	सर्वासु	सप्तमी

(५६) सर्व (नपुंसकलिंगम्)

१ सर्वम्	सर्वे	सर्वाणि	प्रथमा
२ सर्वम्	सर्वे	सर्वाणि	द्वितीया
३ सर्वेण	सर्वाभ्याम्	सर्वैः	तृतीया
४ सर्वस्मै	सर्वाभ्याम्	सर्वेभ्यः	चतुर्थी
५ सर्वस्मात्	सर्वाभ्याम्	सर्वेभ्यः	पञ्चमी
६ सर्वस्य	सर्वयोः	सर्वेषाम्	षष्ठी
७ सर्वस्मिन्	सर्वयोः	सर्वेषु	सप्तमी

अथ धातुरूपावलिः—(तिङन्त)

(५७) परस्मैपदम्

I वर्तमानकालः (पठति)

		द्वेवचनम्)	(वहुवचनम्)
१ प्र. पुरुषः	पठा–मि	पठा–वः	पठा–मः
२ द्वि. पुरुषः	पठ–सि	पठ–थः	पठ–थ
३ तृ. पुरुषः	पठ–ति	पठ–तः	पठ–न्ति

II भूतकालः (अपठ–त्)

१ प्र. पु०	अ–पठम्	अ–पठा–व	अ–पठा–म
२ द्वि. पु०	अ–पठः	अ–पठ–तम्	अ–पठ–त
३ तृ. पु०	अ–पठत्	अ–पठ–ताम्	अ–पठ–न्

III आज्ञार्थः (पठ–तु)

१ प्र. पु०	पठा–नि	पठा–व	पठा–म
२ द्वि. पु०	पठ	पठ–तम्	पठ–त
३ तृ. पु०	पठ–तु	पठ–ताम्	पठ–न्तु

IV विध्यर्थः (पठे–त्)

१ प्र. पु.	पठे–यम्	पठे–व	पठे–म
२ द्वि. पु०	पठेः	पठे–तम्	पठे–त
३ तृ. पु०	पठे–त्	पठे–ताम्	पठे–युः

V भविष्यत्कालः (पठि–ष्य–ति)

१ प्र. पु०	पठि–ष्या–मि	पठि–ष्या–वः	पठि–ष्या–मः
२ द्वि. पु०	पठि–ष्य–सि	पठि–ष्य–थः	पठि–ष्य–थ
३ तृ. पु०	पठि–ष्य–ति	पठि–ष्य–तः	पठि–ष्य–न्ति

(परस्मैपदम्)

I वर्त०	II भूत०	III आज्ञार्थः	IV विध्यर्थः	V भविष्य०
पठ–ति	अ–पठत्	पठ–तु	पठे–त्	पठिष्य–ति
कुप्य–ति	अ–कुप्यत्	कुप्यतु	कुप्येत्	कोपिष्यति
क्षिप–ति	अ–क्षिपत्	क्षिपतु	क्षिपेत्	क्षेप्स्यति
भक्षय–ति	अ–भक्षयत्	भक्षयतु	भक्षयेत्	भक्षयिष्यति
गच्छति	अ–गच्छत्	गच्छ–तु	गच्छेत्	गमिष्य–ति
उप-गच्छति	उप–अगच्छत् * ———— (देखिये अंक [illegible])	उप–गच्छतु	उपगच्छेत्	उप–गमिष्यति
आ-गच्छति	आ–अगच्छम् * =आगच्छत्	आगच्छतु	आगच्छेत्	आगमिष्यति
अनु-गच्छति	अनु+अगच्छत् =अन्वगच्छत् (देखिये अंक ९३)	अनु–गच्छतु	अनु–गच्छेत्	अनुगमिष्यति
उत्-गच्छति =उद्गच्छति*	उत्–अगच्छत् उद्गच्छत् (देखिये अंक ९८)	उद्गच्छतु	उद्गच्छेत्	उद्गमिष्य–ति
निर्-गच्छति	निर्+अगच्छत् निरगच्छत्	निर्गच्छतु	निर्गच्छेत्	निर्गमिष्यति

* जब धातु उपसर्ग-सहित होती है, तब भूतकालदर्शक " अ " कहाँ रखा जाता है इस की ओर ध्यान दीजिये।

I वर्त	II भूत०	III आज्ञार्थः	IV विध्यर्थः	V भविष्य०
अनुसरति	अन्वसरत्	अनुसरतु	अनुसरेत्	अनुसरिष्यति
आ-नयति	आनयत्	आनयतु	आनयेत्	आनेष्यति
आ-ह्वयति	आह्वयत्	आह्वयतु	आह्वयेत्	आह्वास्यति

(५८) आत्मनेपदम्—(कर्तरि प्रयोग—active voice)

I वर्तमानकालः- (क्षम-ते)

	(एकवचनम्)	(द्विवचनम्)	(बहुवचनम्)
१ प्र. पु०	क्षमे	क्षमा-वहे	क्षमा-महे
२ द्वि. पु०	क्षम-से	क्षमे-थे	क्षम-ध्वे
३ तृ. पु०	क्षम-ते	क्षमे-ते	क्षम-न्ते

II भूतकालः— (अ-क्षमत)

१ प्र. पु०	अ-क्षमे	अ-क्षमा-वहि	अ-क्षमा-महि
२ द्वि. पु०	अ-क्षम-थाः	अ-क्षमे-थाम्	अ-क्षम-ध्वम्
३ तृ. पु०	अ-क्षम-त	अ-क्षमे-ताम्	अ-क्षम-न्त

III आज्ञार्थः—(क्षम-ताम्)

१ प्र. पु०	क्षमै	क्षमा-वहै	क्षमा-महै
२ द्वि. पु०	क्षम-स्व	क्षमे-थाम्	क्षम-ध्वम्
३ तृ. पु०	क्षम-ताम्	क्षमे-ताम्	क्षम-न्ताम्

IV विध्यर्थः— (क्षमे-त)

१ प्र. पु०	क्षमे-य	क्षमे-वहि	क्षमे-महि
२ द्वि. पु.	क्षमे-थाः	क्षमे-याथाम्	क्षमे-ध्वम्
३ तृ. पु०	क्षमे-त	क्षमे-याताम्	क्षमे-रन्

V भविष्यत्कालः— (क्षमिष्यते)

१ प्र. पु०	क्षमि-ष्ये	क्षमि-ष्या-वहे	क्षमि-ष्या-महे
२ द्वि. पु.	क्षमि-ष्य-से	क्षमि-ष्ये-थे	क्षमि-ष्य-ध्वे
३ तृ. पु०	क्षमि-ष्य-ते	क्षमि-ष्ये-ते	क्षमि-ष्य-न्ते

आत्मनेपदम्

I वर्त०	II भूत०	III आज्ञार्थः	IV विध्यर्थः	V भविष्य०
लभ-ते	अलभत	लभताम्	लभेत	लप्स्यते
युध्य-ते	अयुध्यत	युध्यताम्	युध्येत	योत्स्यते

I वर्त०	II भूत०	III आज्ञार्थः	IV विध्यर्थः	V भविष्य०
नुद्-ते	अनुदत	नुदताम्	नुदेत	नोत्स्यते
मारय-ते	अमारयत	मारयताम्	मारयेत	मारयिष्यते
भाष-ते	अभाषत	भाषताम्	भाषेत	भाषिष्यते
प्रति-भाषते	प्रत्यभाषत	प्रतिभाषताम्	प्रतिभाषेत	प्रतिभाषिष्यते
वन्द्-ते	अवन्दत	वन्दताम्	वन्देत	वन्दिष्यते

(५९) उपसर्गाः—

ऊपर (क्रमांक ५७ में), गच्छति, उपगच्छति, अनुगच्छति ये रूप आये हैं। 'उप', 'अनु' इन को 'उपसर्ग' कहते हैं। उपसर्ग धातुओं के पहले लगाये जाते हैं। उपसर्ग के प्रयोग से धातुओं को अलग अलग अर्थ प्राप्त होते हैं। और कभी कभी धातु का "पद" भी बदल जाता है। जैसे,

उपसर्गेण धात्वर्थो बलादन्यत्र नीयते।
विहाराहार-संहार-प्रहार-परिहारवत् ॥

(गम्) गच्छति-जाता है।
उप-गच्छति-नज़दीक जाता है।
अनु-गच्छति-पीछे जाता है।
आ-गच्छति-आता है।
निर्-गच्छति-बाहर जाता है।
सं-गच्छते-मिलता है।
(हृ)-हरति-ले जाता है।
आ-हरति-खाता है।
सं-हरति-नाश करता है।
वि-हरति-खेलता है।

परि-हरति-दूर करता है।
प्र-हरति-पीटता है।
(चर्) चरति-खेलता है।
आ-चरति-साधता है।
उद्-चरति-उच्चारता है।
(रम्)-रमते-खेलता है।
वि-रमति-ठहरता है।
(जि)-जयति-जीतता है।
वि-जयते-विजयी होता है।
परा-जयते-हराता है।

और कुछ उपसर्ग—अप, अव, निस्, दुस्,

(६०) प्रयोगाः— [क्रिया का वाच्य-Voice]

संस्कृत में तीन प्रयोग होते हैं--(१) कर्तरि प्रयोग (active voice), (२) कर्मणि प्रयोग (passive voice), और (३) भावे प्रयोग (impersonal voice)

(१) कर्तरि प्रयोग में कर्ता सदा प्रथमा (कर्ता-कारक) में ही रहता है और क्रियापद, कर्ता के पुरुषवचन के ही अनुसार होते हैं। (फिर क्रिया चाहे सकर्मक हो या अकर्मक हो--काल या अर्थ कोई भी हो) जैसे,

बालकः पुस्तकं पठति–अपठत्–पठेत्।

कन्या धावति--अधावत्–धावतु–धावेत्।

(१) कर्मणि प्रयोग में (कर्ता को तृतीया में रखकर) कर्म के ही अनुसार क्रिया के पुरुष–वचन होते हैं। और "य" लगा कर आत्मनेपद का उपयोग होता है।

(कर्तरि) बालकः ग्रंथं पठति–अपठत्।

(कर्मणि) बालकेन ग्रन्थः पठ्यते–अपठ्यत।

अर्थात् सकर्मक क्रियाओं से ही कर्मणि प्रयोग बन सकता है।

(नीचे लिखे हुए उदाहरण देखिये।)

[कर्तरि प्रयोगः] (active voice)			[कर्मणि प्रयोगः] (passive voice)		
(१)	(२)	(३)	(१)	(२)	(३)
कर्ता	कर्म	सकर्मक क्रियापद			
प्रथमा	द्वितीया	क्रियापद	तृतीया	प्रथमा	क्रियापद(विशेषण)
बालकः	गणेशं	नमति	बालकेन	गणेशः	नम्यते
बालकः	गणेशं	अनमत्	बालकेन	गणेशः	अनम्यत or नतः
अशोकः	पुस्तकं	पठति	अशोकेन	पुस्तकं	पठ्यते
,,	,,	अपठत्	,,	,,	अपठ्यत or पठितम्
रामः	जलं	स्पृशति	रामेण	जलं	स्पृश्यते
,,	,,	अस्पृशत्	,,	,,	अस्पृश्यत or स्पृष्टम्
रामः	बाणं	क्षिपति	रामेण	बाणः	क्षिप्यते
,,	,,	अक्षिपत्	,,	,,	अक्षिप्यत or क्षिप्तः
रामः	ओदनं	भक्षयति	रामेण	ओदनः	भक्ष्यते
,,	,,	अभक्षयत्	,,	,,	अभक्ष्यत or भक्षितः
विधिः	वरं	ददाति	विधिना	वरः	दीयते
,,	,,	अददात्	,,	,,	अदीयत or दत्तः
दशरथः	राज्यं	करोति	दशरथेन	राज्यं	क्रियते
,,		अकरोत्	,,	,,	अक्रियत or कृतम्
मुनिः	अस्त्राणि	जानाति(ज्ञा)	मुनिना	अस्त्राणि	ज्ञायन्ते
,,	,,	अजानात्	,,	,,	अज्ञायन्त or ज्ञातानि
रामः	ताटकां	अमारयत	रामेण	ताटका	अमार्यत or मारिता
वानरः	सीतां	अपूजयत	वानरेण	सीता	अपूज्यत or पूजिता

सूचना—(कर्मणि प्रयोग)—संस्कृत में यह एक ही प्रयोग है जिस को " कर्मणि " प्रयोग नाम प्राप्त हुआ है। इस में क्रमांक ६२ के अनुसार, (गण-सापेक्ष काल और अर्थ बनाने के लिये), " य " लगा कर आत्मनेपद का उपयोग करना अवश्य है। (दाहिनी ओर का खम्भा देखिये)

परंतु हिन्दी में (और कुछ भारतीय भाषा में भी) निम्न लिखित " कर्मणि " प्रयोग का और एक रूप मिलता है जिस में कर्ता को " ने " लगाने से वह " अप्रधानकर्ता " बनता है, और कर्म के अनुसार क्रिया के रूप में परिवर्तन होता है। जैसे,

(वर्त०) (कर्तरि प्रयोग)	(कर्मणि प्रयोग)
(सं.) बालकः गीतां पठति।	(सं.) बालकेन गीता पठ्यते।
(हिं.) लड़का गीता पढ़ता है।	(हिं.) लड़के से गीता पढ़ी जाती है।
इसी प्रकार भूतकाल में भी,	
(सं.) बालकः गीतां अपठत्।	(सं.) बालकेन गीता अपठ्यत।
(परंतु) (यह संस्कृत प्रयोग 'कर्तरि' है)	
(हिं.) लड़के ने गीता पढ़ी।	(हिं.) लड़के से गीता पढ़ी गई।
इस हिन्दी प्रयोग को 'कर्मणि' कहते है।	

इन दोनों 'कर्मणि' रूपों की ओर विद्यार्थी विशेष ध्यान दें।

(६१) (३) भावे प्रयोगः—अकर्मक क्रियाओं का कर्म न होने की वजह से उन से कर्मणि प्रयोग नहीं बन सकता है। परंतु भावे प्रयोग बन सकता है; (जैसे)

बालकः धावति। (कर्तरि) } ये दोनों प्रकार अर्थ में एक से (हैं)।
बालकैः धाव्यते। (भावे) } पर उनके रूपों में अंतर है।

(कर्तरि प्रयोगः)		(भावे प्रयोगः) [भाव-वाच्य]	
कर्ता (प्रथमा)	अकर्मक क्रियापद	(तृतीया)	
ईश्वरः	भवति।	ईश्वरेण	भूयते।
अश्वौ	धावतः।	अश्वाभ्याम्	धाव्यते।
बालकाः	पतन्ति।	बालकैः	पत्यते।
शङ्खः	रोदिति।	शङ्खेन	रुद्यते।

सूचना—भावे प्रयोग में क्रिया के लिंग और वचन, न कर्ता के अनुसार होते हैं और न कर्म के अनुसार। क्रियापद सदा तृतीय पुरुष एकवचन में ही रहता है—फिर कर्ता का लिंग वचन कोई भी हों।

(६२) 'कर्माणि' और 'भावे' प्रयोग बनाते समय धातुओं के मूल रूप में कौनसे बदल होते हैं यह निम्न लिखित उदाहरणों से स्पष्ट हो जायगा। (प्रायः धातुओं के मूलरूप को 'य' लगा कर "आत्मनेपद" में (अंक ५८) के अनुसार चलाइये।)

[क. भू. धा. वि.]

(नमति) नम्-नम्यते-नतः
(पश्यति) दृश्-दृश्यते दृष्टः
(पठति) पठ्-पठ्यते-पठितः
(दहति) दह्-दह्यते-दग्धः
(तिष्ठति) स्था-स्थीयते-स्थितः
(पिबति) पा-पीयते-पीतः
(यच्छति) दा-दीयते-दत्तः
(हरति) हृ-ह्रियते-हृतः
(स्मरति) स्मृ-स्मर्यते-स्मृतः
(जयति) जि-जीयते-जितः
(नयति) नी-नीयते-नीतः
(भवति) भू-भूयते-भूतः
(आह्वयति)आह्वे-आहूयते-आहूतः
(वदति) वद्-उद्यते-उदितः
(यजति) यज्-इज्यते-इष्टः
(पृच्छति) प्रच्छ्-पृच्छ्यते-पृष्टः
(क्षिपति) क्षिप्-क्षिप्यते-क्षिप्तः
(स्पृशति) स्पृश्-स्पृश्यते-स्पृष्टः
(साध्नोति) साध्-साध्यते-साधितः
(सुनोति) सु-सूयते-सुतः
(वक्ति) वच्-उच्यते-उक्तः
(see वद् above)

[क. भू. धा. वि.]

(क्रुध्यति) क्रुध्-क्रुध्यते-क्रुद्धः
(तुष्यति) तुष्-तुष्यते-तुष्टः
(कुप्यति) कुप्-कुप्यते-कुपितः
(भक्षयति) भक्ष्—भक्ष्यते-भक्षितः
(चोरयति) चुर्-चोर्यते-चोरितः
(ताडयति) तड्-ताड्यते-ताडितः
(पूजयति) पूज्-पूज्यते-पूजितः
(पीडयति) पीड्-पीड्यते-पीडितः
(बध्नाति) बन्ध् (बध्) } बध्यते-बद्धः
(युनक्ति)-युज्-युज्यते-युक्तः
(गृह्णाति) ग्रह् (गृह्) } गृह्यते-गृहीतः
(जानाति) ज्ञा (जा) } ज्ञायते-ज्ञातः
(क्रीणाति)क्री-क्रीयते-क्रीतः
(करोति) कृ-क्रियते-कृतः
(see हृ above)
(तनोति) तन्-तन्यते-ततः
(दोग्धि) दुह्-दुह्यते-दुग्धः
(लेढि) लिह्-लिह्यते-लीढः

(६३) संस्कृत भाषा में कर्माणि प्रयोग का बहुत महत्त्व रहता है। इस लिये कर्तरि प्रयोग के कर्ता और कर्म इनकी विभक्ति बदल कर कर्माणि

प्रयोग में इन को कौनसी विभक्तियाँ प्राप्त होती हैं और क्रियापद का रूप कैसे बदलता है इस की ओर ध्यान दीजिये। (६०)

(सूचना—कर्मणि प्रयोग के रूप हमेशा आत्मनेपदी होते हैं)

उसी तरह कर्मणि भूतकालवाचक धातुसाधित विशेषण [क. भू. धा. वि. का उपयोग कैसा करते हैं यह भी समझ लें। (६०)

कर्तरि प्रयोग का कर्मणि प्रयोग बनाना और वैसे ही उलटा कर्मणि प्रयोग का कर्तरि प्रयोग करना सीख लेना चाहिये। और उस की आदत रखनी चाहिये। [अधिक उदाहरण के लिये (दूसरा भाग अं. १२४) देखें।]

कर्मणि भूतकालवाचक धातुसाधित विशेषण (क. भू. धा. वि.) "त" प्रत्यय लगाकर बनते हैं। इस "त" का उस के पूर्व रहनेवाले वर्णों से संधि नियम के अनुसार संधि बनती है। [सुविधा के अनुसार संधिनियम सीख लीजिये और (दुसरा भाग) अं. १२६ से अधिक जानकारी प्राप्त कर लीजिये। इस समय ऊपर की जानकारी पर्याप्त है।]

स्वर और व्यंजनों में होनेवाले कुछ बदल नीचे दिये गये हैं।

	स्वर	अ	इ or ई	उ or ऊ	ऋ or ॠ	ऌ
(६४) गुणः	गुण	अ	ए	ओ	अर्	अल्
(६५) वृद्धिः	वृद्धि	आ	ऐ	औ	आर्	आल्

(६६) संप्रसारणम्

व्यञ्जन	य्	व्	र्	ल्
संप्रसारण	इ	उ	ऋ	ऌ

विचार के भिन्न भिन्न नमूने बताने के लिये कुछ योजनाएँ नीचे दी गयी हैं। (आगे I, II, III, IV देखें)।

शब्दों से अन्य शब्द कैसे बनते हैं (साधित होते हैं) उन को बनाने के नियम वगैरह (प्रक्रिया) इस प्रारंभिक पुस्तक में नहीं दिये गये हैं। सिर्फ़ भिन्न भिन्न " साधित " शब्दों की जानकारी विद्यार्थी रखें इतना ही काफी है।

I (कृद्वृत्तिः)—धातुओं से नये शब्द बनाना।

(A) Declinable participles : (68–72) (विकारी)
ये सब विशेषण होते हैं।

(६७) संस्कृत में विशेष्य और विशेषण इन दोनों का (अ) लिंग (आ) वचन और (इ) विभक्तियाँ समान रहती हैं। जैसे,

(वचन) प्रियः पुत्रः। प्रियौ पुत्रौ। प्रियाः पुत्राः।
(लिंग) प्रियः बालकः। प्रिया बालिका। प्रियं गृहम्।
(विभक्ति) प्रियः पुत्रः। प्रियं पुत्रं। प्रियेण पुत्रेण। वगैरह

यल्लिंगं यद्वचनं या च विभक्तिर्विशेष्यस्य।
तल्लिंगं तद्वचनं सा च विभक्तिर्विशेषणस्यापि॥

(६८) (1) Participles of the Present Tense

(a) (परस्मैपदम्) गच्छ्—गच्छत् one who is going

प्रथमा—	(गृहं)	गच्छन्	बालकः
षष्ठी	(वनं)	गच्छतः	रामस्य

इसी प्रकार

स्था—(तिष्ठ्) तिष्ठन्ति—तिष्ठत्

	(तृ. पु. बहु व.)		एक व०	द्वि०	ब०	(प्रथमा)
भू—	(भवन्ति)—	भवत्	(१) भवन्	भवन्तौ	भवन्तः	(,,)
या—	(यान्ति)—	यात्	(२) यान्	यान्तौ	यान्तः	(,,)
हु—	(जुह्वति)—	जुह्वत्	(३) जुह्वत्	जुह्वतौ	जुह्वतः	(,,)
कृ—	(कुर्वन्ति)—	कुर्वत्	(४) कुर्वन्	कुर्वन्तौ	कुर्वन्तः	(,,)

(b) आत्मनेपदम् आन, मान

	(तृ पु. बहुव.)	पुं०	स्त्री०	नपुं०
(१) यज्—	(यजन्ते)—	यजमानः	–ना	नम्
(२) द्विष्	(द्विषते)—	द्विषाणः	–णा	णम्
(३) धा—	(दधते)—	दधानः	–ना	नम्
(४) युध्—	(युध्यन्ते)—	युध्यमानः	–ना	–नम्
(५) सु—	(सुन्वते)—	सुन्वानः	–ना	–नम्
(६) विद् (विन्द्)	(विन्दन्ते)—	विन्द-मानः	–ना	–नम्
(७) भिद्	(भिन्दते)—	भिन्दानः	–ना	–नम्
(८) कृ—	(कुर्वते)—	कुर्वाणः	–णा	–णम्
(९) ग्रह्	(गृह्णते)—	गृह्णानः	–ना	–नम्
(१०) लंघ्—	(लंघयन्ते)—	लंघयमानः	–ना	–नम्

(६९) (2) Past Passive Participles : (क्त—क. भू. धा. वि)

[देखिये कर्माणि प्रयोग— 60–63]

(पुंल्लिंग)	(स्त्रीलिंग)	(नपुंसकलिंग)
गणेशः नतः	सरस्वती नता	दैवतं नतम्
ऋग्वेदः पठितः	गीता पठिता	सुबोधसंस्कृतं पठितम्
ओदनः भक्षितः	शर्करा भक्षिता	फलं भक्षितम्
वृक्षः स्पृष्टः	लता स्पृष्टा	जलं स्पृष्टम्
ग्रन्थः रचितः	कादम्बरी रचिता	नाटकं रचितम्

(७०) (3) Past Active Participles. (त-वत्)

	(Passive)	(active)
कृ (to do)—	कृत (done)—	कृतवत् (one who has done)
छिद् (to cut)—	छिन्न (cut)—	छिन्नवत् (,, ,, cut)
पठ् (to study)—	पठित (studied)—	पठितवत् (,, ,, (studied)

(७१) (4) Participles of the Future Tense.

वद्—(वदिष्यति)—वदिष्यत् (One who will speak)
क्षम्—(क्षमिष्यते)— क्षमिष्यमाण (,, ,, ,, forgive)

पठ्—(पठिष्यति)—पठिष्यत् (One who will study)
लभ्—(लप्स्यते)- लप्स्य-मान („ „ „ get)

(७२) (5) Potential Participles ending in तव्य, अनीय, य.

e. g. (कृ. to do) कर्तव्य, करणीय, कार्य
fit to be done, what ought to be done

इसी प्रकार— (कृ to do H. करने योग्य)

दा	दातव्य	दानीय	देय
पठ्	पठितव्य	पठनीय	पठ्य
सृज्	स्रष्टव्य	सर्जनीय	सृज्य
प्रच्छ्	प्रष्टव्य	पृच्छनीय	पृच्छ्य
बुध्	बोद्धव्य	बोधनीय	बोध्य
श्रु	श्रोतव्य	श्रवणीय	श्राव्य
नी	नेतव्य	नयनीय	नेय
गम्	गन्तव्य	गमनीय	गम्य
वन्द्	वन्दितव्य	वन्दनीय	वन्द्य
पा	पातव्य	पानीय	पेय

I (B) Indeclinable Participles :(अव्यय, अविकारी)

(७३) कृत्वा (= having done (कर के)

(उपसर्गरहित)-त्वा (त्वान्त)		(उपसर्गसहित)-य (ल्यबन्त)	
ज्ञा—ज्ञा-त्वा—	(जानकर)	अवज्ञा-य	(अपमान कर के)
भू—भू-त्वा—	(हो कर)	अनु-भूय	(अनुभव कर के)
गम्—ग-त्वा—	(जा कर)	आगम्य	(आ कर)
बध्—बद्ध्वा—	(बाँध कर)	निबध्य	(जकड़ कर)
पृच्छ्—पृष्ट्वा—	(पूछ कर)	आपृच्छ्य	(अनुमति ले कर)
दा—दत्वा—	(दे कर)	आदाय	(लेकर)
कृ—कृत्वा—	(कर के)	अपकृत्य	(अपकार कर के)
स्था—स्थित्वा—	(खड़ा हो कर)	उत्थाय	(उठ कर)
पठ्—पठित्वा—	(पढ़ कर)		

इसी प्रकारः—भाषित्वा, उषित्वा, निधाय, सन्धाय, आरुह्य, आवृत्य, प्रतिगृह्य आदि.

(७४) कर्तुम् (तुमन्त) करने के लिये,

इसी प्रकार

गन्तुम् (जाने के लिये); आगन्तुम् (आने के लिये)
पीडयितुम् (पीडा देने के लिये); ज्ञातुम् (जानने के लिये)
पठितुम् (पढ़ने के लिये); भवितुम् (होने के लिये)
रक्षितुम् (रक्षा करने के लिये); दातुम् (देने के लिये)
लब्धुम् (प्राप्त करने के लिये)
बोद्धुम् (जानने के लिये) बद्धुम् (बाँधने के लिये)
पक्तुम् (पकाने के लिये) इत्यादि.

(७५) कर्तु–काम ('कर्तुम्' से बना हुआ विशेषण)

करने की इच्छा रखनेवाला,

इसी प्रकार—गन्तुकामः, आगन्तुकामः, पीडयितुकामः, ज्ञातुकामः, पठितुकामः, भवितुकामः, रक्षितुकामः दातुकामः, लब्धुकामः इत्यादि.

I C धातु को भिन्न भिन्न " कृत् " प्रत्यय लगाने से भिन्न भिन्न संज्ञाएँ बन जाती हैं। जैसे, (१), (२), (३), (४)

(७६) (१) क्रिया करनेवाला।

e. g. (अनुचरति) – अनुचर + अ = अनुचरः (० रा or ० री)
(चोरयति) – चुर + अ = चोरः
(नदति) – नद् + अ = नदः (नदी)
(हरति) – हृ + अ = (प्राण)–हरः)

(कृ) विघ्नकरः, सुखकरः, दुःखकरः, कुम्भकारः, भारहारः

(दा) सुखदः, दुःखदः

(धृ) चापधरः, जटाधरः इत्या०

